३६७। व्यं पूर्व्वस्। (व्यं १।, पूर्व्वं १।)।

परं व्यं पूर्व्वं स्यात् से सति।

राजानमतिक्रान्ता अतिराज्ञी, अतिश्वी, अत्यक्ष:, अतिस्त्रि:।

प्यन्तेन सह नित्यं ष: स्यात्। निष्क्रान्तो वनात् निर्वण:, अपगतो ग्रामात् अपग्राम:, अन्तर्गतो मुखात् अन्तर्मुख इत्यादि।

क्वचिदन्यत्रापि। एतै: सूत्रैर्यत्राप्राप्त: सस्तत्रापि शिष्ट-प्रयोगदर्शनात् ष: स्यात्। पुनाराज: पुनर्गव: भूतपूर्व्व: (१) पुन:-शिल्पी अविनाभूतम् अविनाभाव: सहभाव: अन्यथोपपत्ति: (२) अध्वगन्तव्य इत्यादि।

अस्याद्यन्तेनापि कृतोपपदस्य। स्याद्युत्पत्ते: प्रागपि कृदन्तेन सहोपपदस्य नित्यं ष: स्यात्। कुम्भं करोतीति कुम्भकार:, शक्तिग्रह:, धनक्रीतीत्यादि। हरिभाविनीत्यादौ तु णिनोऽन्यार्थत्वात् ह एवोक्त:।

न द्वयादिनिमित्तस्य प्रत्यादे:। द्वयादिनिमित्तस्य प्रत्यादे: कुमादेरित्यनेन प्राप्त: षो न स्यात्। वृक्षं प्रति विद्योतते विद्युत्, अभिमन्युरर्ज्जुनत: प्रति स्थित्वा गत:, त्रिगर्त्तेभ्य: परीत्यादि।

३६७। व्यम्। व्यमिति सविधायकलक्षणे षीनिर्दिष्टस्योप-

---

(१) पुनाराज इत्यत्र सङ्ख्याहोराघ इत्यनेन, पुनर्गव इत्यत्र गोरतार्थे इत्यनेन षप्रत्ययविधानार्थं समासविधानम्। भूतपूर्व्व इति भूत. पूर्व्वमित्यर्थ:। एवम् अध्वा गन्तव्य अध्वगन्तव्य इति।

(२) अन्यथोत्पत्तिरिति अन्यार्थोपपत्तिरिति च पाठान्तरम्।

लक्षकं, तेन पूर्व्वकायः अर्द्धपिप्पलीत्यादौ पूर्व्वादीनां पूर्व्वनिपातो, न तु गाकं प्रति इत्यत्र प्रतेरिति। अतिराजीति—अतिक्रान्ता राजानमित्यादिरूपेणार्थकथनमित्यन्ये। सङ्ख्याहोरात्रः प. पगौ च इति पः, पित्त्वादीप्। अतिस्त्रीत्यत्र गुणोऽल्यप्राण्युपमानात् इति पः। अत्यह्न इत्यत्र सङ्ख्याहोरात्र इति पे सर्व्वैकदेशेत्यादिनाह्नोऽह्नादेशः। पूर्व्वपदार्थप्राधान्येऽपि पविधानस्येत्यादि फलम्। एवम् अतिनदिः अतिभर्त्ता अतिधर्म्म इत्यादौ कादयो न स्युः अहत्वात्। अतिस्त्रिरिति—परपदार्थस्याप्राधान्याद्गौणत्वेन गवादेरिति स्वः।

राजदन्तादिषु परम्। प्राप्तपूर्व्वनिपातं दं राजदन्तादिषु पठितं चेत् परं स्यात्। दन्तानां राजा राजदन्तः लिप्तवासितं सिक्तसंसृष्टं नग्नमुषितं भ्रष्टलुठित (१) अवक्लिन्नपक्वं अर्पितोदस्तः दृष्टगाढ़ः। समस्तु पूर्व्वकालस्य लक्षणस्य विषयः। उदूखल-मुषलं तण्डुलक्लिन्नं चित्ररथवाह्लीकं विष्वक्सेनार्ज्जुनौ चित्रास्वाती भार्य्यापती पुत्त्रपश्वौ केशश्मश्रू विशेषणविशेष्ये स्नातकराजानौ प्रतिष्ठालिप्से शूद्राचार्य्यौ मर्य्यादाभिविधौ शिरोजानू पाण्डुष्टत-राष्ट्रौ (२)। अलाबूश्च कर्कन्धूश्च ते, ईदूतोर्वा परदे इति ह्रः, ते च दन्भूश्च ता अलाबुकर्कन्धुदन्भ्वः। उदूखलादिभिर्मुषलादीनां न परनिपातः। विशेष्यविशेषणे इत्यपि स्यादिति कश्चित्।

---

(१) भ्रष्टलुञ्चितमिति संक्षिप्तसारे भ्रष्टलुञ्चितमिति पाणिनीये।

(२) द्वन्द्वोदाहरणेषु तु कस्यचित् बहुत्वात् कस्यचिदभ्यर्हितत्वात् कस्यचित् कनिष्ठादित्वात् परनिपातप्रसक्तौ दन्तराज इति हृन्मुग्धबोधम्।

३६८। संख्याव्याद्रात्राङ्गुलिभ्यामः।

(संख्या-व्यात् ५।, रात्रि अङ्गुलिभ्यां ५॥, अः १।)।

संख्याया व्याश्च पराभ्या रात्र्यङ्गुलिभ्या-मः स्यात् यादौ, न तु सार्थे। अतिरात्रः अत्यङ्गुलः।

हरिणा त्रातो हरित्रातः। विष्णवे दत्तं विष्णुदत्तम्। अच्युतात् जातम् अच्युतजातम्। कृष्णस्य सखा कृष्णसखः,

---

एवं वनस्याग्रे अग्रेवनं, रात्रीणा गणो गणरात्रं, वाणस्य वारो वारवाणः, अन्तरं गृहं गृहान्तरम् (१) अन्तरशब्दोऽन्यार्थः, श्वः परं परश्व इत्यादि। शेषं शिष्टप्रयोगानुसारेण ज्ञेयम्।

३६८। संख्या। मण्डूकगत्या यादावित्यनुवर्त्तते इति। न च तत्र यसे संख्यावाचिनो रात्रेः षाविधानात् षगयोरेवास्य विषय इत्यत आह यादाविति। न च तत्र षित्त्वात् स्त्रियामीव्विधानात् संख्याग्रहण कार्त्तव्यमिति वाच्यं, रात्रान्ताना-मह्नोरात्रादित्वादेव पुंस्त्वात्। संख्याव्यादिति कनिर्देशाच्च यथासंख्यमित्यत आह—अतिरात्रः अत्यङ्गुल इति। गे तु द्वयोः रात्र्योः समाहारः द्विरात्रम्। एवं निर्गतमङ्गुलिभ्यो निरङ्गुलं, द्वे अङ्गुली परिमाणमस्य द्व्यङ्गुलं चेत्रं, द्व्यङ्गुला भूमिः। "भूमे-रप्यर्द्धमङ्गुल"मिति तु यवमानार्थोऽङ्गुलशब्दस्तथाच "अङ्गुलन्तु यवो मत" इत्यमरमाला। कृष्णसख इति—सख्यहरिति मः। महा-

---

(१) गृहान्तरमित्यत्र विशेष्यत्वात् गृहशब्दस्य कर्म्मधारये परवर्त्तित्वनिरासः। एतत्सर्व्वं गणपाठसामर्थ्यादिति मुग्धबोधम्।

[illegible], [illegible], [illegible], [illegible]-[illegible], [illegible]-
[illegible], [illegible] ।

३३८ । मुख्यार्थेभ्यः । (मुख्यार्थेभ्यः ६।१) ।

मुख्यार्थेभ्यः [illegible] स्यात् [illegible] । [illegible], [illegible] [illegible] । [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] ।

इति [illegible] ।

[illegible] इति—[illegible] [illegible] वा [illegible] इति वाच्यं, [illegible] [illegible] [illegible] । [illegible] इति—[illegible] [illegible] इति वाच्यं, [illegible]-[illegible] इति [illegible] [illegible]—[illegible] [illegible] इति वाच्यं, [illegible] [illegible] । [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] । [illegible] इति—[illegible] इति [illegible] । [illegible] इति—[illegible] वाच्यं, [illegible] [illegible] ।

३३९ । [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] । [illegible]—[illegible] [illegible] इति [illegible] । [illegible] [illegible] [illegible]. [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] इति—[illegible], [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] ।

द्विगु-समासः, (गः)।

तस्यार्थे विषये, वाच्ये अपत्यार्थण्णिकादिकम्।
प्रोज्झ्याजादेः, समाहारे, गस्त्रिधोत्तरदे परे॥

पञ्चभिर्गोभिः क्रीतः पञ्चगुः।

इदानीं गमाह तस्यार्थे इत्यादि। गस्त्रिधा त्रिप्रकारः, तत्र तस्यार्थे एकः, समाहारे एकः, उत्तरदे परे एक इति। तस्यार्थे कृतगसात् तत्यस्य सत्त्वासत्त्वात्(१) तस्यार्थे इत्यत्र एकस्याः स्या एव विषयत्वं वाच्यत्वं चेत्यर्थ इत्यत आह विषय इत्यादि। अपत्यार्थं ण्णिकादिकञ्च (२) विहाय अजादेस्तस्यार्थे वाच्ये, ण्णिकादिकस्य इसादेश्च तस्यार्थे विषयभूते ग इत्यर्थः (३)। यथा पञ्चसु

---

(१) तस्यार्थे तद्धितस्यार्थे कृतगसात् कृतद्विगुसमासात् तत्यस्य तद्धितप्रत्ययस्य अजादेरिसादेर्वेति शेषः सत्त्वासत्त्वात् विद्यमानत्वाविद्यमानत्वेन इत्यर्थः।

(२) ण्णिरेव ण्णिक छन्दोऽनुरोधात् स्वार्थे कः, ण्णिप्रभृतिकमित्यर्थ इति दुर्गादास-कार्त्तिकेय-गङ्गाधराः।

(३) अपत्यार्थण्णिकादिकस्य इसादेश्च तद्धितस्यार्थे विषय एव द्विगुर्न तु वाच्य इत्यभिप्रायः।

अत्र दुर्गादासः—यत्र तस्यार्थविषये समासः क्रियते तत्र तद्धितप्रत्ययोत्पत्तेः पूर्व्वावस्थायां समासे कृते ततः प्रत्ययोत्पत्तौ इष्टसिद्धिः, तेन द्वयोर्मात्रोरपत्यमित्यत्र प्राप्तव्यस्य ण्णप्रत्ययस्योत्पत्तेः पूर्व्वावस्थाया द्विमातृ एतयोरेकपदीभावे पश्चात् ण्ण-प्रत्यये कृते द्वि इत्यस्यैव वृद्धौ सङ्ख्यासभद्रादित्यादिना उरि कृते द्वैमातुर इति। एवं पञ्चानां नापितानामपत्यं पाञ्चनापितिः। वाच्ये तु यथा पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यत्र कर्म्मणि वाच्ये करणकारकात् ढकेकादित्यादिना प्राप्तव्यप्रत्ययस्यार्थे वाच्ये समासेनैव तद्धितस्य उक्तार्थत्वे उक्तार्थानामप्रयोग इति न्यायात् तद्धित-प्रत्ययस्यानुत्पत्तौ गवावादेरिति ह्रस्वः। अजादेरिति किं? द्वयोर्मूर्द्धोर्भवः द्विमूर्द्धन्य इत्यादौ विषये एव समासः स्यान्न तु वाच्ये इति। कार्त्तिकेय गङ्गाधरा-वप्येवमाहतुः।

कपालेषु संस्कृतः सूपः पञ्चकपालः सूपः, द्वौ वेदौ वेत्त्यधीते वा द्विवेदः द्वितन्त्र इत्यादौ संस्कृताद्यर्थस्य सेनोक्तत्वात् उक्तार्थानामप्रयोग इति न्यायात् न ष्णादयः। पञ्चानां नापितानामपत्यं पाञ्चनापितिः, द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशौर्पिकं, द्विखारीकः, अर्द्धखारीणः, पञ्चानां गर्गाणां भूतपूर्व्वो गौः पञ्चगर्गरूप्यः, पञ्चसु ब्राह्मणेषु साधुः पञ्चब्राह्मण्य इत्यादौ अपत्याद्यर्थस्य विषयभूतत्वेनानुक्तत्वात् ष्णादयः स्युरेव। ष्णिकादि इत्यनेन अर्हति इत्यादौ विहितो यः ष्णिकस्तदाद्या, अर्हति इत्यादिविहिता ये त्याः संज्ञायामेव तेषां, वेत्त्यादिभिन्नेष्वर्थेषु येऽज्जादयस्त्यास्तेषाञ्च ग्रहणं, तेन पञ्चगुरित्यत्र क्रीतार्थस्य अर्हतीत्यादित्वेऽप्यसंज्ञायामष्णिकादित्वाद्वाच्ये गः। संज्ञायान्तु पञ्चभिर्लोहितैः क्रीतं पाञ्चलोहितिकमित्यादौ विषय एव गः ष्णिकादित्वात्। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकं द्विसुवर्णं, द्विसाहस्रं द्विसहस्रमित्यादौ संज्ञायामपि वा त्यस्य विधानात् विषये वाच्येऽपि गः। एतत् सर्व्वं तपादे विशिष्य वक्तव्यम् (१)।

---

(१) तद्धितार्थोत्तरपदसमाहारे च इति पाणिनिसूत्रम्। (२।१।५१।) तत्र विषयद्विगुरेव दृश्यते न तु वाच्यद्विगुः। वोपदेवमते यत्र वाच्यद्विगु पाणिनिमते तत्रापि तद्धितप्रत्ययो भवति भूत्वा च "द्विगोर्लुगनपत्ये" (४।१।८८।) इत्यनेन तस्यैव उत्पन्नस्य तद्धितप्रत्ययस्य लुग्भवति। "यदि तु तद्धितार्थे वाच्ये इति व्याख्यायेत तर्हि पौर्व्वशाल इत्यादौ तद्धितो न स्यात्। तदर्थस्य समासेनैवोक्तत्वात्। द्विगोर्लुगनपत्ये इति ज्ञापकादुक्तेऽपि तद्धितार्थे तद्धितो भवतीति कल्पनाप्रतिपत्तिगौरवमिति भावः" इति तत्त्वबोधिनी। संक्षिप्तसारेऽप्येवमेव। वोपदेवेन तु कातन्त्रमतमनुसृतमिति प्रतीयते। तथाच—"पाणिनिना तद्धितार्थविषय एव समासं कृत्वा पश्चादुत्पन्नस्य तद्धितस्य लोपार्थं "लुगनपत्ये" इत्यादि सूत्राणि

३७०। गोक्यादतोऽपात्रादेः।५।

(गोक्यात् ५।, अतः ५।, अपात्रादे ५।, ईप्।१।)।

गोक्यादकारान्तादीप् स्यात्, न तु पात्रादेः।

त्रयाणां लोकानां समाहारः त्रिलोकी।

पात्रादेस्तु—द्विपात्रं त्रिभुवन, चतुर्युगम्।

३७०। गोक्या। गस्यैक्यं गैक्य तस्मात्। पात्रमादिर्यस्य स पात्रादिर्न पात्रादिरपात्रादिस्तस्मात्। निषेधो यज्जातीयस्य विधिरपि तज्जातीयस्य इति न्यायात् पात्रादिवर्जनेनैवात इत्यस्य लाभेऽपि अतो ग्रहणं कृतसान्तादन्तस्यापि प्राप्त्यर्थं, तेन षोड़श-राजी द्विधुरी पञ्चराजीत्यादि। पञ्चराजशब्दस्य पात्रादौ पाठात् पञ्चराजमिति भाष्यम्। त्रिलोकीति--ईपः पित्करणादेव चगैक्य-वमित्यनेन न क्लीवत्वमतो नित्यस्त्रीत्वमिति। एवं पञ्चपुली सप्तशतीत्यादि। ननु समाहारस्यानेकवृत्तित्वात् कथमेका-पूपीति चेत् सत्यं, दानक्रियया सम्भ्रमेण (१) वा एकस्याप्यपूपस्य बहुत्वमध्यारोप्य समाहार इति (२)। पात्रादेस्त्वित्यादि—द्विपात्रं

विहितानि। * * * यत्र यत्र परमते लुगस्ति तत्रास्मन्मते चाभिधेये, यत्र च लुक् नास्ति तत्र विषयभूते समासोऽयमिष्यते इति"—इति चलुटयवृत्तौ २६४ सूत्र-टीकायां कविराज।

(१) सम्भ्रमेण आदरेण, तथाच—सम्भ्रम साध्वसेऽपि स्यात् सम्यगादरयो-रपि—इति मेदिनी। सम्भ्रमेण त्वरया वा इत्यर्थ, विलम्बेन दानस्यानुचितत्वात्—इति विद्यालङ्कार।

(२) दानक्रियाया बहुत्वेन एकापूपस्यापि बहुत्व सगच्छते। तथाच एकम-पूप गृहीत्वा सर्वेभ्यो ददातीति रूपेण एकस्याप्यपूपस्य बहुत्वमध्यारोप्य समाहार इति पाणिनीया व्यवस्थापयन्तीति कार्त्तिकेय।

३७१ । वानापः । (वा ।१।, अन्-आपः ५।) । (१)

अनन्तादापश्च ईप् स्याद्वा । पञ्चकर्म्मी पञ्चकर्म्म, त्रिखट्वी त्रिखट्वम् ।

३७२ । तार्थे मानात् काण्डात्त्वक्षेत्रे ।

(तार्थे ७, मानात् ५।, काण्डात् ५।, तु १।, अक्षेत्रे ७) ।

त्र्याढ़की, त्रिकाण्डी रज्जुः । क्षेत्रे तु त्रिकाण्डा भूमिः ।

त्रिभुवनं त्रिगुणं चतुःशतं चतुष्पथं चतुर्मुखं पञ्चनावं पञ्चगवं द्विरात्रमित्यादि शिष्टप्रयोगानुसारेण बोध्यम् । अत इति किं ? त्रिजगत् पञ्चपटु ।

३७१ । वा । मण्डूकगत्या संख्याव्यादित्यतोऽकारानुवृत्त्या, वा इत्यत्राऽप्रश्लेषाद्वा अ-इत्यस्य लाभः (२) । वाशब्दोऽत्र समुच्चयार्थः । तथाचानन्तावन्ताभ्याम् अ ईप् च स्यादित्यर्थः । तेन पञ्चकर्म्म त्रितक्षमित्यादि स्यात् । अस्योपस्तमज्ञकत्वेन पञ्चकर्म्मी त्रितक्षीत्यत्र नकाराकारयोर्लोपः ।

३७२ । तार्थे । इहाकारत्यो नानुवर्त्तते, परत्र वा ग्रहणात् (३) । तार्थे गे मानार्थकाटीप् स्यात्, काण्डशब्दात्तु क्षेत्र-

---

(१) (वा ।१।, अ ।१।, अन् आप ।१।) इति वा पदच्छेदः ।

(२) केचित्तु मण्डूकगत्या संख्याव्यादिति सूत्रादतोऽनुवर्त्तनमङ्गीकुर्व्वन्ति, तन्न युक्तं, सन्निहितस्यापोऽनुवृत्तित्वेन निराकाङ्क्षत्वात्, सूत्रे अकारस्य लाभेऽपि तद्व्याख्यानगौरवाच्च इति कार्त्तिकेयः ।

(३) अत्र अप्रत्ययो नानुवर्त्ततेऽनिष्टत्वात्, वापि नानुवर्त्तते परत्र वा ग्रहणात् । ईबेवानुवर्त्तते इष्टत्वात् । इष्टतोऽनुवृत्तौना प्रवृत्तिनिवृत्ती स्यातामिति न्यायात् । इति कार्त्तिकेयः ।

३७३। पुरुषाद्वा। (पुरुषात् ५।, वा।१।)।

त्रिपुरुषी त्रिपुरुषा। त्रिसख त्रिगवं त्रिनावं, त्रिखारं त्रिखारि, त्र्यह्नः।

भिन्ने वाच्ये। त्र्याढ़की—त्रय आढ़का मानमस्या इति वाक्यम्। एव द्वौ द्रोणौ मानमस्या द्विद्रोणी द्व्याढ़कीत्यादि। त्रिकाण्डीति—त्रयः काण्डाः परिमाणमस्या इति वाक्यम्। एवं द्विकाण्डीत्यादि। सर्व्वत्र परिमाणार्थविहितस्य मात्र-त्यस्य लुक्। अचेत्रे इति किं? त्रिकाण्डा भूमिः द्विकाण्डा चेत्रभक्तिः, चेत्र-भक्तिः चेत्रैकदेशः। मानात् किं? पञ्चभिरश्वैः क्रीता पञ्चाश्वा। द्विवर्षा त्रिशता इत्यत्रापि न स्यात्, सुपञ्चालादौ सख्यापूर्व्व-परिमाणार्थसंवत्सरसख्याना पृथग्ग्रहणेन कालसंख्ययोरपरि-माणार्थत्वात्। समाहारे तु दशशतीत्यादयः स्युरेव।

न विस्ताचितकम्बल्यात्। तार्थे गे मानार्थेभ्य एभ्य ईप् न स्यात्। द्वे विस्ते मानमस्या द्विविस्ता द्व्याचिता द्विकम्बल्या।

३७३। पुरु। तार्थे गे मानार्थात् पुरुषादीप् स्याद्वा। त्रिपुरुषीति—त्रयः पुरुषा मानमस्या इति वाक्यम्। एवं द्विपुरुषी द्विपुरुषा परिखा। त्रिसखमित्यादि—त्रयाणा सखीनां समाहार इति वाक्यम्। क्रमेण सख्यह्नोराज्ञः, गोरतार्थे, नावोऽर्द्धान्ने च, खार्य्या वेति ष-प्रत्ययः। त्रिखारि—षाभावपक्षे चगैक्यवमिति क्लीवत्वात् क्लीवे ह्रस्वः। त्र्यह्न इति—त्रयाणाम् अह्ना समाहार इति वाक्य, सख्यह्नोराज्ञ इति षे सर्व्वैकदेश इत्यत्र ऐक्यनिषेधात्

३७४। द्विवेर्वाङ्गुलेरः।

(द्विवेः ५।, वा १।, अङ्गुलेः ५।, अः १।)।

द्व्यङ्गुलं द्व्यङ्गुलि, त्र्यङ्गुलं त्रिगावम्।

पञ्च गावो धनं यस्यासौ पञ्चगवधनः द्विनावधनः द्विखारधनः द्व्यह्नप्रियः।

इति गः।

अह्नो नाह्नादेशः, अह्नोऽपवादित्वात् पुंस्त्वम्; एवं द्व्यहः। असंख्ये तु द्वयोरह्नोर्भवः द्व्यह्नः सायह्न इत्यादि स्यादेव।

३७४। द्विवेः। वाग्रहणात् भावात् नार्थे द्वन्द्वस्य च निवृत्तिः। तथाच द्विविभ्याम् अङ्गुलेः स्याद् अनार्थे गे १,। द्व्यङ्गुलमिति—द्वयोरङ्गुल्योः समाहार इति वाक्यम्। पक्षे द्व्यङ्गुलि। एवं त्र्यङ्गुलं त्र्यङ्गुलि, द्व्यङ्गुली प्रमाणमस्य द्व्यङ्गुलप्रमाणः द्व्यङ्गुलिप्रमाणः इत्यादि। नार्थे तु द्वाभ्यामङ्गुलिभ्यां क्रीतः द्व्यङ्गुलिः। द्व्यङ्गुलमित्यादि—संख्याव्यादित्वः। उत्तरसमासात् पञ्चगवधन इति। आदौ त्रिति ईं ङः, पश्चात् धनशब्दे परे पूर्वयो र्द्वयो र्गः, गवि

---

१ तद्धितार्थे द्विगौ च [illegible]। [illegible] द्विविभ्यां [illegible] तद्धितार्थे द्विगौ [illegible]। [illegible]।

अव्ययीभाव-समासः, (वः)।

वः क-सामीप्य-सादृश्य-साकल्यानुक्रमर्द्धिषु।
वीप्सा-पर्य्यन्त-योग्यत्व पश्चादर्थानतिक्रमे।
शब्दप्रादुर्भावाभाव-यौगपद्येष्वनेकधा॥

गोरुत्तरदत्वात् गोरतार्थे इति षः (१)। एवं दिनावधनः द्विखारधनः द्विखारीधनः द्व्यह्नप्रिय इत्यत्र नावोऽर्द्धात् गे च, खार्य्या वा, सख्यहोरात्र इति क्रमेण ष, षेऽह्नोऽह्नादेशः। द्वे अह्नी जातस्य द्व्यह्नजात इत्यादौ त्रिभिर्दैः षः, पश्चात् पूर्व्वयो र्दयो र्गः। अभिधानात् उत्तरदे गसो नित्य एव, तेन पञ्चगोधनम इति न स्यात्। अन्ये तु समाहारः सघः, तत्र तार्थे इत्यनेनैव गे सिद्धे समाहार इति कृतं संघरूप तार्थे ग निराकरणार्थमित्याहुः (२)। परे तु दिग्वाचिपूर्व्वदानामपि गमुक्त्वा पूर्व्वस्यां शालायां भवः पौर्व्वशालः पूर्व्वा शाला प्रिया अस्य पूर्व्वशालाप्रियः इत्युदाहरन्ति।

इति गसः।

इदानीं वमाह। वः कीत्यादि। वपूर्व्वदाना सो वस उक्तः।

---

(१) ताद्धर्थार्थप्रतिपत्तिकरे बहुव्रीहौ सत्यपि पदमध्ये समासविहितकार्य्यार्थे उत्तरपदे द्विगुरभिहित इति गङ्गाधर।

(२) "तद्धितार्थे समाहारे द्विगु संख्यायाः" इति संक्षिप्तसार सूत्रम् (समासपादे ११८)। ननु पञ्चानां गवां समाहार इति वाक्ये समासान्तप्रत्यये कृते, पुनस्तस्य लुकि, तद्धितार्थद्विगौ गोशब्दात् समासान्तनिषेधात्, पञ्चगुरित्यनेन भवितव्यम्, न तु पञ्चगव इत्याशङ्क्याह समाहार इति। तथाच समाहारस्यत्वे न पुनस्तद्धितार्थे समास इति भाव। गोयीचन्द्रस्य टीका द्रष्टव्या।

३७५ । वात् क्तेर्म्मोऽतोऽप्याः ।

(वात् ५।, क्तेः ६।, मः १।, अतः ५।, अप्याः ६।) ।

अकारान्तात् वात् परस्याः क्ते र्मः स्यात् नतु प्याः ।

कृष्णमधिकृत्य प्रवृत्ता कथा, अधिकृष्णम् ।

अप्याः किं ? कृष्णस्य समीपात् गतः, उपकृष्णात् गतः ।

स च क सामीप्याद्यर्थेषु (१) गम्यमानेषु व्यानां दानां स्याद्यन्तैः सहाभिधानप्रामाण्यान्नित्यं स्यात् । क-सामीप्याद्यर्थभेदादनेकधा अनेकप्रकार इत्यर्थः । परसूत्रसापेक्षत्वादिह नोदाहृतम् ।

३७५ । वात् । अप्या इति पृथग् दकारण 'लुक् परा'दित्यता-ननुवर्त्तनार्थम् । कृष्णमधिकृत्येत्यादि । यद्यपि क इति सामान्ये-नोक्तं तथाप्यभिधानात् डीस्योरर्थं एव ज्ञेयः । एवं स्त्रीष्वधिकृत्य कथा प्रवर्त्तते अधिस्त्रीत्यादि । अन्ये तु स्यर्थ एव वमं कुर्व्वन्ति । नित्यत्वादस्य डीस्यन्तदेनार्थकथनम् । उपकृष्णादिति—अप्या इत्यस्य प्रत्युदाहरणेनैव सामीप्योदाहरणं दर्शितम् । एव कुम्भस्य समीपम् उपकुम्भमित्यादि । "दण्डकान् दक्षिणेनाहं सरितोऽद्रीन् वनानि च" इत्यत्र एनत्यान्तदक्षिणेनेति व्यस्य सामीप्यार्थत्वेऽपि न मः अनभिधानात् । गृहस्योपरि तिष्ठति, उपरि शिरसो वट इत्यत्र सामीप्यार्थस्याविवक्षितत्वात्, अन्यथा उपरिशब्दस्य द्वित्वं स्यात् ।

---

(१) अत्र सामीप्य-सादृश्य-साकल्य-योग्यत्वानां धर्म्मवाचकत्वेन निर्द्देशात् एवं वक्ष्यमाणोदाहरणस्थले धर्म्मिवाचकत्वेन निर्द्देशाच्च उभयत्रैव स्यात्, तेन उपकृष्णं भूमि, उपकृष्णं भूम्या इत्यादि, अन्येषु विशेषो नास्तीति गङ्गाधर ।

३७६। क्वीष्ठ्यो र्वा।

(क्वी-ष्ठ्योः ६॥, वा ।१।)।

उपक्षण्णं उपक्षण्णेन कार्य्यम्। उपक्षण्णं उपक्षण्णे स्थितः।

३७७। लुक् परात्।

(लुक् ।१।, परात् ५।)।

अकारान्तादन्यस्मात् वात् परस्याः क्वे र्लुक् स्यात्।

३७८। सहः सोऽकाले।

(सहः ६।, सः १।, अकाले ७।)।

सहस्य सः स्यात् नतु काले।

हरेः सदृश सहरि। काले तु सहपूर्व्वाह्णम्।

३७६। क्वी। अकारान्तात् वात् परयोःक्वीष्ठ्योर्मः स्याद्वा। वाशब्दस्य व्यवस्थावाचित्वात् सुमद्रम् उन्मत्तगङ्गम् एकविंशति-भारद्वाजमित्यादौ सन्तद्धिनदीसंख्यावयवेभ्यः स्या न वा मादेशः।

३७७। लुक्। वेति नानुवर्त्तते, क्वीवाद्देत्यत्र वाग्रहणात्। क्वेरित्यनुवर्त्तते इत्यत आह क्वेरिति।

३७८। सहः। वादित्यस्यार्थवशात् क्वेर्विपरिणामः, तेन वे इत्यर्थः। हरेः सदृशः इति सहरि गुरुरित्यत्र गुणभूतेऽपि सादृश्ये वः, सादृश्येत्यनेन गुणागुणभूतसादृश्यग्रहणात्। एवं सदृश. किख्याः सकिखि, हरेः सादृश्य सहरि गुरोः, सकिखि कुक्कुरस्येत्यादौ। किखिः खेखीति ख्यातःशृगालभेदः। तथाच— "किखिः शृगालभेदे स्या"दिति विश्वः, वानरीति केचित्। सह-

तृणेन सह सकलमत्ति सतृणम्। ज्येष्ठमनुक्रम्य अनुज्येष्ठम्। मद्राणां समृद्धिः सुमद्रम्। विष्णुं विष्णुं प्रति प्रतिविष्णु। अग्निग्रन्थपर्य्यन्तमधीते साग्नि। रूपस्य योग्यं अनुरूपम्। शिवस्य पश्चात् अनुशिवम्। शक्तिमनतिक्रम्य यथाशक्ति। हरेः शब्दः प्रादुर्भूतः इतिहरि। पापस्याभावः अपापम्। चक्रेण युगपद्देहि सचक्रम्। यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामाः यावच्छ्लोकम्।

पूर्व्वाह्णमिति—पूर्व्वाह्णस्य सदृशमित्यर्थः। कालस्य निषेधान्न सहस्य सः। तृणेन सहेति—यदर्थं यद्गृहीतं तत्र तस्याशेषत्वं साकल्यम्। सतृणमत्ति तृणमपि न परित्यजतीत्यर्थः। ज्येष्ठमनुक्रम्येति—अनुक्रम (१) आनुपूर्व्व्यम्, अनुज्येष्ठ प्रविशति ज्येष्ठानुपूर्व्व्येण प्रविशतीत्यर्थः। मद्राणां (२) समृद्धिरिति—सुमद्रं वर्त्तते सुभिक्षं वर्त्तते, मद्राणां भिक्षाणां वाधिक्येन ऋद्धिः प्रवर्त्तते इत्यर्थः। यदा समृद्धेः प्राधान्यं तदैव वसः। यदा समृद्धेरप्राधान्यं तदा प्रादित्वात् य एव, यथा समृद्धाः मद्रा सुमद्रा इति, समृद्धा मद्राणां

---

(१) अनुक्रमश्चात्र यौगपद्यं, तेन ज्येष्ठपरिहाराभावविशिष्ट-प्रवेशादिरिति विद्यालङ्कारः। "अनुक्रमे चाह अनुज्येष्ठमिति—ज्येष्ठस्य हीनो भूत्वा गच्छतीत्यर्थः। ज्येष्ठमनुक्रम्य इत्यत्र हीनार्थेन अनुना योगे द्वितीया, न तु कर्म्मणि, अन्यथा कारकत्वादेव समासे सिद्धे अनुक्रमस्य पृथगुपहणं विफलं स्यात्। अत्राकर्म्मकोऽयं क्रमधातु"रिति दुर्गादास-गङ्गाधरौ।

(२) देशभेदे तथानन्दे पुमान् मद्रः प्रकीर्त्तितः।
यदा मद्रा नदीभेदे स्त्रिया तत्रेति शासनम्॥
इति गङ्गाधरधृतकोषवचनम्।

विशेष्यमाणत्वात् । विष्णुं विष्णुं प्रतीति—यद्यप्यस्य नित्यसत्त्वात् वाक्याभावः, तथापि धिक्समयेत्यनेन वीप्साया प्रतिना द्वीविधानानर्थक्यात् वाक्यस्थितिः । वीप्सार्थस्य सेनोक्तत्वान्न द्विः । अग्निग्रन्थपर्य्यन्तमधीते इति—यद्यप्यत्र साकल्यमस्ति, तथाप्यग्निग्रन्थपर्य्यन्तमधीते ततोऽन्यन्नाधीत इत्यस्यासाकल्यार्थं वचनम्, एवं सालोकमधीते, असकलेऽप्यध्ययने आलोकपर्य्यन्तं पठतीत्यर्थः । रूपस्य योग्यमिति—अनुरूपं ददाति, रूपस्य योग्य ददातीत्यर्थः । शिवस्य पश्चादिति—अनुशिवं भक्ताः । एवमनुरथं पादाताः, रथाना पश्चादित्यर्थः । मेघदूते—"तदनु जलद श्रोष्यसि श्रोत्रपेय"-मिति तु पैसात् । अत्र स्विवर्जनमिति परे (१) । शक्तिमनतिक्रम्येति—यथाशक्ति ददाति, एवं यथाबलमधीते इत्यादि । हरेः शब्दस्य प्रादुर्भूतमिति—प्रादुर्भावः प्रकाशः, हरिशब्दो लोके प्रकाशते इत्यर्थः (२) । एवम् इतिपाणिनि उद्विक्रमादित्यमित्यपि (३) । अभावस्योदाहरणमाह अपापमिति । अभावः संसर्गाभावः (४) स

---

(१) अत्र सर्व्वनामशब्देन सह अव्ययीभावसमासो न भवतीति पाणिनीयाना मतमित्यर्थ । अतएव तदनु इत्यादौ नाव्ययीभाव. ।

(२) स्वरूपपरेण षष्ठ्यन्तेन हरिशब्देन सह प्रकाशार्थस्य इतिशब्दस्य समास इति प्रौढमनोरमा तत्त्वबोधिनी च । शब्देति ग्रहणात् हिमालयो नाम इत्यत्र, तथा दिलीप इति राजेन्दुरित्यादौ च न समास, अर्थप्रकाशनार्थत्वात्—इति विद्यालङ्कार ।

(३) उत्शब्दोऽपि प्रकाशनार्थक, तथाच मेदिनी—"उत् प्रकाशे विभागे चे"त्यादि—इति विद्यालङ्कार ।

(४) यद्यपि प्रागभावो ध्वंसोऽत्यन्ताभावश्च संसर्गाभावस्तथापि सामयिकात्यन्ताभाव एवात्र गृहीत इति विद्यालङ्कार ।

च प्रतियोगिनिरूपणाधीननिरूपक एव, (१) तेन अर्थाभाव (२) ऋद्ध्यभावप्रध्वंसाभावोपभोगाभावानां ग्रहणम्। अत्रार्थाभावो ह्युत्तरदार्थाभावः, यथा अपापं, मक्षिकाया अभावो निर्मक्षिकम् इत्यादि। ब्राह्मणो न भवतीत्यत्र प्रसज्यप्रतिषेधनञा ब्राह्मणत्वधर्म्मो निषिध्यते, गौरश्वो न भवतीत्यत्र अन्योन्याभावेनार्थान्तर निषिध्यते, अतो नास्त्युभयत्रार्थाभावः, अर्थशब्दस्यात्र वस्तुपरत्वात्। ऋद्ध्य-भावो यवनस्य दुर्यवनं, दुर्भिक्षमित्यत्र नोत्तरदार्थाभावः, किन्तु यवनादिसम्बन्धिन्या ऋद्धेरिति। अत्ययः शीतस्य अतिशीतम् (३) अत्ययो वसन्तस्यातिवसन्तमित्यादि। अत्ययोऽतिक्रमः, प्रध्वंसा-

---

(१) यद्यप्यभावस्य निरूपणत्वेन नास्ति भेदः, तथापि यस्यासावभावः स सम्बन्धी भिद्यते। तद्भेदाच्चाभावस्याप्युपकल्पितो भेद इति कातन्त्रटीका (२७२सू)।

(२) अर्थाभाव क्वचिद्देशे सर्व्वथैवाभावो वस्तुना, न तत्पक्षस्य पश्चादिति कातन्त्रटीका। अर्थविरोधी अभावः अर्थाभावः अत्यन्ताभाव एव, अन्योन्या-भावस्य तु सर्व्वत्र प्रतियोगितावच्छेदकेनैव विरोधादित्याशयेन अर्थपदमुपात्तम्। अयञ्च समास उत्तरपदार्थाभावद्योतकः नञनञ्साधारणाव्ययेन भवति। नञ्-तत्पुरुषस्तु नञैव अन्योन्याभावबोधकः सर्व्वत्र, क्वचिदभावबोधकोऽपीत्यनयो-र्विशेषः। अतएव निर्म्मक्षिकम् अपापमित्यादिवत् अनुपलम्भ इत्यादीनामभाव-बोधकत्वेऽपि न क्षतिः। वस्तुतो नाशपर्य्यायात्ययस्य पृथग् ग्रहणात् प्रागभाव निवारणार्थं विद्यमानपदार्थप्रतियोगिताद्योतनार्थञ्चार्थग्रहणं, तेन प्रागभावाभि प्रायेण कपाले अघटमित्यादिर्न प्रयोगः, न वा अपदार्थस्य शशशृङ्गादेरभावबोध-नाय निःशशशृङ्गमित्यादिः, एषामलीकतयार्थत्वाभावेन तत्प्रतियोगिकाभावाप्र-सिद्धेः इत्युक्तं सिद्धान्तकौमुदीटीकायां तारानाथेन।

(३) यद्यपि कस्यचिदतीतत्वे कस्यचिद्वर्त्तमानत्वेऽपि अतिशीतमिति भवति, तथापि शीत ऋतुप्रध्वंसेऽयं प्रयोग इति विद्यासागरः। अतिशीत शीतान्यतीतानि भ्रष्टानीत्यर्थ इति प्रयोगरत्नमाला।

भावः (१) स च नात्यन्ताभावः किन्तु शीतादिप्रध्वंसः संसर्गाभाव एव (२)। यौवनस्य नायमुपभोगकालोऽतियौवनम् अतिकम्बलमित्यादि। गतोपभोगस्तु (३) विद्यमानस्यैव यौवनादेर्वर्त्तमानकाले उपभोगाभावः अतो नार्थाभावोऽत्ययश्चेति। चक्रेण युगपद्धेहीति—यौगपद्यम् एककालता, सचक्रं निधेहि, युगपच्चक्रं निधेहीत्यर्थः (४)। सहः सोऽकाले इति सहस्य सः। यौगपद्येष्विति त्वनिर्द्देशादन्येष्वर्थेष्वपि, तेनावधारणे गम्यमाने यावदिति व्यस्य नित्यं वस इत्यत आह यावन्त इत्यादि। अवधारणमियत्तापरिच्छेद, इयदेवेति निश्चय इत्यर्थः (५)। यावच्छ्लोकमच्युतप्रणामाः, (६) एवं यावद्भोजनपात्रं ब्राह्मणानामन्त्र-

---

(१) व्यतिक्रम इति—अतीतत्वमित्यर्थ इति विद्यालङ्कार।

(२) अर्थाभावस्तु सर्व्वथैव कस्मिन्प्रदेशे वस्तुन संसर्गाभावः, न तु वस्तुनः प्रध्वंस, अत अव्ययोऽत्र अर्थाभावाद्भिद्यते इति गोयीचन्द्र।

(३) अत्र तु उपभोगस्य सामयिकात्यन्ताभाव इत्यर्थः। एवञ्च उपभुज्यते अस्मिन्निति उपभोगः उपभोगवर्त्तमानकाल इत्यर्थ। गतश्चासावुपभोगश्चेति-कर्म्मधारयः, उपभोगवर्त्तमानकालाभाव इत्यर्थ इति विद्यालङ्कारः। सम्प्रति नोपभोगकाल, किन्तु गत आगमिष्यति वेति कालोपाधेर्ध्वंसः प्रागभावो वेत्यर्थः। यद्वायमुपभोगकालादन्य एवेत्यन्योन्याभाव इत्यर्थ इति प्रयोगरत्नमाला (८९८ सू)।

(४) युगपच्छब्दस्याव्ययत्वेऽपि अगमकत्वात् युगपच्चक्रमिति वाक्ये न समास, तेन चक्रं युगपन्निधेहि नत्वनेकवारमित्यर्थ इति विद्यालङ्कारः। हे विष्णो एकस्मिन् काले चक्रेण सह गदा धारय इत्यर्थ इति दुर्गादासः।

(५) सङ्ख्यया परिमाणेन वा अन्यूनानतिरिक्तीकरणमित्यर्थ इति विद्यालङ्कार।

(६)। श्लोकानामियत्तया प्रणामानामियत्ता विवक्षिता इत्यर्थ इति दुर्गादास।

यस्व (१) यावद्वृक्षं आनयस्व (२) इत्यादि । अवधारणे किं ? यावत् दत्तं तावद्भुक्तं, कियद्दत्तं कियद्भुक्तमिति नावधारित-मित्यर्थः(३) । एवमसादृश्यार्थे वर्त्तमानस्य यथेति व्यस्य वसस्तेन ये ये तथाभूताः यथातथमिति, ये ये वृद्धा यथावृद्धं ब्राह्मणास्ति-ष्ठन्ति । यथाशक्ति ददातीत्यत्रानुक्रमानतिक्रमयोः पूर्व्वेणैव इति । सादृश्ये तु यथावृद्धास्तथा युवानः (४) । इह गुणभूतसादृश्ये निषेधादन्यत्र स्यादेवेति ज्ञापितम् ।

अव्यस्य च प्रतिनाऽल्पत्वे । अल्पत्वे वर्त्तमानेन प्रतिना सह व्यस्याव्यस्य च वो नित्यं स्यात् । स्वःप्रति सायंप्रति सूपप्रति शाकप्रति, स्वर्गादेः स्तोकमित्यर्थः (५) । अल्पत्वे किं ? वृक्षं प्रति द्योतते विद्युत्, वृक्षं लक्ष्यीकृत्य विद्योतते इत्यर्थः ।

एकद्वित्रिचतुरऽक्षशलाकानां परिणा द्यूतपराजये । द्यूत-पराजये गम्यमाने परिणा सहैषां नित्यं वः स्यात् । एकेन परि एकपरि द्विपरि त्रिपरि चतुष्परि । एकादिशब्दैरक्ष एवाभि-धीयते, द्यूतपराजय इत्यस्य सम्बन्धात्तथाहि एकेनाक्षेण हारि-तमित्यादिक्रमेणार्थः, तथाच पञ्चभिरक्षैः शलाकाभिर्वा पञ्चिका

---

(१) यावन्ति भोजनपात्राणि वर्त्तन्ते तावतो ब्राह्मणानित्यर्थः ।

(२) यावन्तो वृक्षाः पञ्च वा षट् वा सम्भवन्ति तानेवानय इति गोयीचन्द्रः ।

(३) संख्यानिश्चयः परिमाणनिश्चयो वा न कृत इत्यर्थ इति विद्या-लङ्कारः ।

(४) वृद्धसदृशा युवान इत्यर्थः ।

(५) न कुम्भपति दारिद्र्ये इति प्रयोगरत्नमाला । दारिद्र्ये स्वल्पमपि सूपं नास्तीत्यर्थः । एवम् अल्पत्व शाकप्रति—इति तट्टीका ।

नाम द्यूतं, तत्र यदि पञ्च उत्ताना: अवाञ्चो वा पतन्ति तदा पातयिता जयति, अन्यथापाते पातयिता हारयतीति। एवम् अक्षपरि, शलाकापरि—अक्षेण शलाकया वा परिहारितमित्यर्थः। इहाक्षशलाकयोरेकत्वे (१) वर्त्तमानयोरेवायं सः स्वभावात्, न हि स्वभावार्थो निमित्तान्तरमपेक्षते इति।

अनोर्दैर्घ्यसमीपयोः। अनयोर्वर्त्तमानस्यानोः स्याद्यन्तेन सह वो नित्यं स्यात्। अनुयमुनं मथुरा, यमुनेव दीर्घेत्यर्थः। अनुवृक्षं नदी, वृक्षस्य समीपा इत्यर्थः। धर्म्मिवचनस्यानोरनेन सः, सामीप्यधर्म्मवाचिनस्तु पूर्व्वेणैव। यथा अनुवृक्षं, वृक्षस्य सामीप्यमित्यर्थः। अनयोः किं? वृक्षमनु विद्योतते विद्युत्, वृक्षं लक्ष्यीकृत्य इत्यर्थः।

नाम्नि नदीभिरन्यार्थे। नदीवाचिभिः शब्दैः सहान्यदार्थे वर्त्तमानस्य स्याद्यन्तस्य वो नित्यं स्यात् सञ्ज्ञाया विषये। उन्मत्त-गङ्गं, लोहितगङ्गं(२), शनैर्गङ्गं, तूष्णींगङ्गं—चत्वारि देशनामानि।

---

(१) नतु द्वित्वबहुत्वयोरित्यर्थः। तथाच अक्षाभ्याम् अक्षैः शलाकाभ्या-मित्यादि नोदाहर्त्तव्यम् अनयोर्द्वित्वादिनिषेधादिति प्रयोगरत्नमाला (९०२ सू.) अक्षेण परिहारितमित्यर्थकथनेनैतत् सूचितं, अक्षादय करणतृतीयान्ताः सम-स्यन्ते इति—इति विद्यालङ्कारः।

(२) अतिवेगवत्तया अनवरतं तीरभूमिभङ्गकारिणीति उन्मत्ता इव गङ्गा यस्मिन्, मृत्तिकादिलोहितयोगात् लोहिनी गङ्गा यस्मिन्निति विग्रह इति प्रयोग-रत्नमालाटीका। एतत्तु अर्थकथनमात्रं नतु वाक्यं, तथाच—"नित्यसमासत्वात् वाक्यमेषां न विद्यते" इति गोयीचन्द्रः।

नाम्नि किं ? गौरा गङ्गा यस्मिन् गौरगङ्गो देशः। अन्यार्थे किं ? क्षणा चासौ वेला चेति क्षणवेला (१)।

तिष्ठद्ग्वाद्याः। तिष्ठद्ग्वाद्या वसंज्ञका निपात्यन्ते।

तिष्ठद्ग्वादिषु तिष्ठद्गु वहद्गु चायतीगवम्।
खले-संक्रियमाणस्यां लूयमानाच्च संस्कृतात्।
लूनाद्यववुषे पूत पूयमानात् यवस्तथा।
आयतीपुष्यपाराद्वात् समा अथ समं समात्।
भूमिः पदातिरिन्द्रेतौ सुनिदुरपवात् समम्।
प्ररथं प्रमृगं प्राह्णमपसव्य प्रदक्षिणम्।
सम्प्रत्यसम्प्रत्येकान्तं तथापदिशमित्यपि।
षट्त्रिंशत् कथिता ज्ञेयं शेषं शिष्टप्रयोगतः॥

तिष्ठन्ति वहन्ति आयन्ति च गावो यस्मिन् काले स कालः तिष्ठद्गु वहद्गु आयतीगवञ्च (२)। खले यवा यस्मिन् काले स कालः खलेयवं, संक्रियमाणयवं लूयमानयवं संस्कृतयवं लूनयवं वृत्तेबुषमित्यादि। पूता यवा यस्मिन् काले स कालः पूतयवं, पूयमानयवम्। आयत्याः समाः संवत्सरा आयतीसमम्। एवं पुष्यसमं

---

१ [illegible] इति सिद्धान्तकौमुद्यामुदाहृतम्। [illegible] [illegible] इति पाठो दृश्यते [illegible] इति। [illegible] [illegible] पाठो दृश्यते। [illegible] तु वेला इति।

(२ [illegible] प्रयोगो नास्ति [illegible]। [illegible] आयतीगवं [illegible]। [illegible] [illegible]। [illegible] — इति [illegible] [illegible]।

पापसमम् अघसमम्। समत्वं भूमेः समभूमि समंभूमि। एवं समंपदाति समपदाति। पूर्व्वपदार्थप्राधान्य एव वसः, परपदार्थप्राधान्ये तु समभूमिः समपदातिरिति य एव। समाः पदातयो यस्मिन् समपदातीति पारायणम्। समशब्दस्य वा सममादेशो निपातनात्, समंभूमि समपदातीत्यन्ये। समार्थसममिति व्यस्य आभ्यां सह वस इति कश्चित्। शोभनत्वं समस्य सुषमं, निःषमं दुःषमं अपरसमम्। एवं प्रगतत्व रथस्य प्ररथ, प्रमृगं प्राह्णमपसव्यं प्रदक्षिणमिति। परपदार्थप्राधान्यात्तु कुमार्योर्नित्यमिति ष एव। सम्प्रतिशब्दं पठित्वा असम्प्रतीति पठितं वसे क्वते सान्तराभावात्। एकत्वमन्तस्य एकान्तम्। दिशोर्मध्यमपदिशमिति। अस्याकृतिगणत्वात् अप्रदक्षिणमित्यादि(१)। इह यद्यत् कार्य्यं लक्षणेन न सिध्यति तत्तत् सर्व्वं निपातनाज्ज्ञेयम्। तिष्ठद्गवादीनां वादन्यः सो न स्यात्, यथा परमं तिष्ठद्गु इत्यादि। वसस्तु स्यादेव, तथाच— "आतिष्ठद्गु जपन् सन्ध्या प्रक्रान्तामायतीगव"मिति भट्टिः (२)।

अभिप्रत्योराभिमुख्ये लक्षणद्रा वा। आभिमुख्ये वर्त्तमान-

---

(१) अत्राप्रदक्षिणशब्दस्य पृथक्पाठस्त्वेतेषां समासान्तरनिषेधार्थ इति बृहन्मुग्धबोधम्। पञ्चसु हस्तलिखितेषु आदर्शपुस्तकेषु सक्षिप्तसारे च अप्रदक्षिणमित्यत्र अपदक्षिणमिति, काशिकायां तारानाथकृतसिद्धान्तकौमुदीटीकायाञ्च अपरदक्षिणमिति पाठो दृश्यते।

(२) भट्टौ ४। १४, तत्र भरत —"तिष्ठन्ति स्थिरीभवन्ति गावो यस्मिन् स तिष्ठद्गु काल, रात्रे प्रथमनाडिका, तत्र हि विश्रान्ता गाव पश्चादुत्थाप्य दुह्यन्ते। आयन्ति गोष्ठं गावो यस्मिन् काले स आयतीगव काल अर्द्धास्तमितभास्कर, प्रायशस्तत्रैव गवानयनात्" इति।

योरभिप्रत्योर्लक्षणेऽर्थे विहिता या ढौ तदन्तेन सह वः स्याद्वा। अभ्यग्नि प्रत्यग्नि, पक्षे अभ्यग्निं प्रत्यग्निं शलभाः पतन्ति, अग्निं लक्ष्यीकृत्य शलभाः पतन्तीत्यर्थः। अत्राग्निर्लक्षणं, तेन पतङ्गानां पातो लक्ष्यते, तयोर्लक्ष्यलक्षणसम्बन्धो यथाऽभिप्रतिभ्यां द्योत्यते तथा शब्दशक्तिस्वाभाव्यादाभिमुख्यमपि द्योत्यते, अतएव अग्नेरभिमुखमेव पतङ्गाः पतन्ति न पार्श्वे न पृष्ठत इत्यर्थः (१)। आभिमुख्ये किं ? गङ्गामभिवसति (२)। लक्षणढेऽति किं ? स्रुघ्नं प्रतिगच्छति, स्रुघ्नान्मथुरां चलितो दिङ्मोहात् स्रुघ्नमेव निवर्त्तत इत्यर्थः। नात्र लक्षणे ढौ किन्तु ढ इति।

आङ्पर्य्यपवहिरञ्चां प्या। एषां प्यन्तेन सह वः स्याद्वा। आपाटलिपुत्त्रं परित्रिगर्त्तम् अपत्रिगर्त्तं (३) वहिर्ग्रामं प्राग्ग्रामं वृष्टो देवः। पक्षे आ पाटलिपुत्त्रात् परि त्रिगर्त्तेभ्य इत्यादि। वहिरादिसाहचर्य्यादाङादीनां योगे येष्वर्थेषु पी तेष्वर्थेषु (४) एवेह ग्रहणं, तेनापगतः शब्दात् अपशब्दः अपधर्म्मः अपचार इत्यादौ क्रान्तादौ निरादेः प्या इति षः (५)। वहिरङ्गो गुण

---

(१) तथाच अग्निज्ञाप्यं शलभकर्त्तृकमग्न्यभिमुख्य पतनमिति बोधः।

(२) अत्र अभिना लक्ष्यलक्षणसम्बन्धो द्योत्यते, न त्वाभिमुख्यमिति गोयीचन्द्रः।

(३) अपपरी वर्ज्जनार्थौ इति प्रयोगरत्नमाला। तेन त्रिगर्त्तान् वर्ज्जयित्वा इत्यर्थः। त्रिगर्त्तशब्दो लाहोरसन्निहितदेशविशेषस्य संज्ञा।

(४) तेन अपपरि इत्येतयोर्वर्जनार्थे एव, आङ् इत्यस्य मर्य्यादाभिविध्योरेवेति बोध्यव्यम्।

(५) एतेनैतत्प्रतिपादित क्रान्ताद्यर्थव्यतिरिक्तोऽस्य विषय इति गोयीचन्द्रः।

इत्यत्र त्वन्यदार्थप्राधान्यात् हः। वहिरङ्गं प्राग्ग्राम (१) इति तु विशेषणविशेष्यत्वेन यसात्।

पारे मध्ये षा। पारे मध्ये इत्येतयोः षन्तेन सह वः स्याद्वा। पारेगङ्गं, मध्येकाशि। सूत्रनिर्द्देशात् स्या अलुक्। पक्षे पारे गङ्गायाः, मध्ये काश्याः। गङ्गापारं, काशीमध्यम् इति तु षीषात्। एके तु अग्रेऽन्तरोर्ग्रहणं कृत्वा अग्रे रामस्य अग्रेरामम्, अन्तःप्रयागस्य अन्तःप्रयागमित्यप्याहुः।

संख्याया विद्याजन्मैकयोगैः। विद्यया जन्मना वा एको योगो यत्र, तद्वाचिभिः सह संख्यावाचिनो वः स्याद्वा। द्वौ मुनी व्याकरणस्य, द्विमुनि व्याकरणस्य, विद्यया पाणिनिकात्यायनयोर्मुन्योरेको योगः (२)। पूर्व्वदार्थप्राधान्य एव वसस्तेन द्विमुनिरागम इत्यत्रान्यदार्थप्राधान्यात् हः। एके तु वा त्वन्यार्थे इति सूत्रं विधाय द्विमुनि शब्दानुशिष्टेः, द्विमुनिरागम इत्याहुः (३)। द्वौ गार्ग्यौ लोकाना द्विगार्ग्यं दशभारद्वाजं (४) द्वयोर्गार्ग्ययोर्दशाना भारद्वाजानाञ्च जन्मनैकयोगः। एके तु अनेकसंख्याया एव वसं विधाय एकमुनिर्भाष्यस्येत्यादि प्रत्युदाहरन्ति।

समाहारे नदीभिश्च। समाहारेऽर्थे नदीवाचिभिः सह

---

(१) बहिश्च तदङ्गञ्चेति, प्राक् चासौ ग्रामश्चेति वाक्यम्।

(२) जनकतासम्बन्धे इत्यर्थ, उभयोरेव व्याकरणजनकत्वात् इति विद्यालङ्कार'।

(३) शब्दानुशिष्टेर्व्याकरणस्येत्यर्थः।

(४) भरद्वाजवंशोद्भवाना दशसङ्ख्येत्यर्थः।

३७६ । शरद्विपाड़यश्चेतोमनोविडुपानड्धिमवद्दिविनडुद्दिक् चतुर्यत्तदोऽः ।

(शरद्—तदः ५।, अः १।) ।

एभ्यः अः स्यात् वे । उपशरदम् ।

संख्यावाचिनो वः स्यात् । द्वयोर्गङ्गयोः समाहारः द्विगङ्गं, सप्तगोदावरम् (१) । समाहारे किम् ? एकनदी ।

३७६ । शरत् । शरच्च विपाट् च अयश्च चेतश्च मनश्च विट् च उपानच्च हिमवांश्च विच्च द्यौश्च अनड्वांश्च दिक् च चत्वारश्च यच्च तच्च तत् तस्मात् । उपशरदमिति—शरदः समीपमिति वाक्यम् । एवम् उपविपाशम् उपायसम् उपचेतसं प्रतिमनसं प्रतिविशम् उपोपानहम् उपहिमवतम् उपविदं प्रतिदिवं प्रत्यनडुहं प्रतिदिशम् उपचतुरम् उपयदम् उपतदम् इति । वे किं ? चतसृणां दिशां समाहारः चतुर्द्दिक्, तथाच—"चतुर्द्दिगीशानवमन्य मानिनी"ति कालिदासः । अन्ये तु पथि-दृश्-उपसत् कियदनसः शरदादौ पठन्ति, अयश्चेतोमनोविड्विदस्तु नाहुः ।

---

(१) यद्यपि गोदावरी एकैव, तथापि सप्तपदसमभिव्याहारात् तत्पदेन तीर्थावाहनमन्त्रदृष्टसप्तनद्यो गृह्यन्ते, तीर्थत्वेनाविशेषात्, तेन गङ्गा यमुना गोदावरी सरस्वती नर्म्मदा सिन्धुः कावेरी च इत्यर्थः । अयमव्ययीभावो द्विगोर्बाधक विशेषत्वात् । ननु पञ्चनदमित्यत्र द्विगुसमासकरणे कोदोष ? उच्यते—समाहारद्विगौ क्लीवत्वात् स्यमोरेव अम्भावः स्यात्, अव्ययीभावे तु पञ्चमीभिन्नसर्व्वविभक्ते रम्भाव इति । अतएव सप्तगोदावरं स्नाता इति सप्तम्यन्तादिप्रयोगाभाव एव दोष इत्यर्थः—इति प्रयोगरत्नमालाटीका (९०९)

३८० । **जराया जरस् च ।**

(जरायाः ६।, जरस् ।१।, च ।१।) ।

उपजरसम् ।

३८१ । **सरजसोपशुने ।** (सरजस-उपशुने १॥) ।

निपात्ये ।

३८२ । **सम्परःप्रत्यनुभ्योऽक्ष्णः ।**

(सम्-परस्-प्रति-अनुभ्यः ५।।।, अक्ष्णः ५।) ।

समक्षम् ।

---

३८० । जरायाः अः स्याद्वे तस्मिन् जरसादेशश्च । उपजरसमिति—जरायाः समीपमिति वाक्यम् ।

३८१ । सर । सरजसश्च उपशुनश्च ते । रजसा सह सकलमत्ति सरजस, साकल्ये वः, सहः सोऽकाले इति सहस्य सः । हे तु सरजसं पद्ममित्यसाधु । सरजसतामवनेरपा निपातः इति किराते चिन्त्यम् । शुनः समीपम् उपशुनं, श्वयुवमघोनामिति ते निषेधेऽपि वस्योत्व निपातनात् । सहोपाभ्यामेव नियमात् उपरजः प्रतिश्च इत्यत्र मन इत्यनेन सूत्रेण अत्योऽपि न स्यात् ।

३८२ । सम्परः । सम्च परच प्रतिश्च अनुश्च ते तेभ्यः । एभ्यः परादक्ष्णः अः स्याद्वे । समक्षमिति—अक्ष्णोः समीपमिति वाक्यम् । पर इति कृतसान्तादेशस्य [illegible] समीपादित्वात् [illegible]

३८३ । अनः । (अनः ५।) ।

अनन्तात् अः स्यात् वे । अध्यात्मम् ।

३८४ । क्लीवाद्वा । (क्लीवात् ५।, वा ।१।) ।

उपचर्म्मं उपचर्म्म ।

टिष्टस्य परस् इत्यस्य ग्रहणम् । अक्ष्नः परि परोक्षम्, आङ् पर्य्यपबहिरञ्चामित्यादिना वः (१) । अन्ये तु अक्षि अक्षि परि परोक्षमिति वीप्सायां व इत्याहुः । एके तु अक्ष्णोः परः परोक्षं, पारस्करादित्वात् सुम् इत्याहुः । अक्षिणी प्रति प्रत्यक्षम्, अभि प्रत्योराभिमुख्ये इत्यादिना वः । वीप्सायामित्यन्यः । प्रत्यक्षो घट इति तु इन्द्रियार्थेनाक्षशब्देन प्रादिसात् । अक्ष्णोः समीपसन्वक्षं, सामीप्ये वः ।

३८३ । अनः । अध्यात्ममिति—आत्मानमात्मनि वा अधिकृत्य अध्यात्मं, कार्य्ये वः । अत्ये न्वोर्ल्लोपोताविति नलोपे ययोरित्यादिना अलोपः ।

३८४ । क्लीवात् । क्लीवलिङ्गादनन्तादः स्याद्वा वे । उपचर्म्ममित्यादि—चर्म्मणः समीपमिति वाक्यं, सामीप्ये वः । एव प्रत्यहं प्रत्यहः, वीप्सायां वः ।

---

(१) अक्ष्नः परमिति विग्रहे * * * निपातनात् परस्योकारादेश, परोक्षम् । परोक्षा क्रियेत्यादि तु अर्श आद्यचि—इति सिद्धान्तकौमुदी । अक्ष्नः परमिति—अविषय इत्यर्थः, वृत्तिविषये अक्षिशब्द इन्द्रियमात्रपर इति तत्त्वबोधिनी ।

३८५ । झप्नदीपौर्णमास्याग्रहायणीगिरे र्वा ।

(झप्—गिरेः ५।, वा ।१।) ।

उपसमिधं उपसमित्, उपनदं उपनदि ।

इति वः ।

षट् समासाः ।

३८६ । पथ्यप्पुरः से ।

(पथिन्-अप्-पुरः ५।, से ७।) ।

एभ्यः अः स्यात् से सति । सखिपथौ, रम्यपथो देशः, महापथः, दक्षिणापथः, चतुष्पथं, उपपथं, विमलापं सरः, विष्णुपुरम् ।

---

३८५ । झप् । झप् प्रत्याहारः । झप् च नदी च पौर्णमासी च आग्रहायणी च गिरिश्च तत्तस्मात् । झवन्तान्नद्यादेश्च अः स्याद्वा वे । पुनर्व्वाग्रहणं परत्र निवृत्त्यर्थम् । उपसमिधमित्यादि—समिधः समीपमिति वाक्यम् । एवम् उपदृशदम् उपतड़ितम्, पक्षे उपसमित् इत्यादि । उपनदमित्यादि—नद्यादीनां स्वरूपस्य ग्रहणं, नद्याः समीपमिति वाक्यम् । एवम् उपपौर्णमासम् उपपौर्णमासि उपाग्रहायणम् उपाग्रहायणि उपगिरम् उपगिरि, "अनुगिरमृतुभिर्वितायमानामिति माघ. (१) । इत्यव्ययीभावः ।

३८६ । पथ्यप् । पन्थाश्च आपश्च पूश्च तत् तस्मात् । स

---

(१) शिशुपालवधे ७ । २, गिरौ ऋतुभिर्वितन्यमानामित्यर्थः ।

३८७ । द्व्यन्तर्गेर्योऽपोऽनात् ।

(द्वि-अन्तर्-गेः ५।, ई ।१।, अः १।, अपः ६।, अनात् ५।) ।

एभ्योऽनवर्णान्तेभ्योऽपोऽकार ईः स्यात् ।

द्वीपं अन्तरीपं समीपम् । अनात् किं ? प्रापम् ।

३८८ । समापानूपौ । (समाप-अनूपौ १॥) ।

निपात्यौ । समापो देवयजनं, अनूपो देशः ।

इति सामान्यार्थम्, अतः षट्सूदाहरति सखिपथावित्यादि । सखा च पन्थाश्च तौ, रम्यः पन्था यत्र, महांश्चासौ पन्थाश्चेति, दक्षिणस्यां पन्था इत्यर्थे दक्षिणोत्तरादाहौ इति स्था आकारादेशः । चतुर्णां पथां समाहारः, पथः समीपे, विमला आपो यस्मिन् । विष्णुपुरमिति—विष्णोः पूरिति वाक्यम् । यद्यपि अदन्तः पुर-शब्दोऽस्ति तथापि पुर्शब्देनानिष्टनिवारणार्थमिदम् ।

३८७ । द्व्यन्त । द्वौ च अन्तश्च गिश्च तत् तस्मात्, न अः अनस्तस्मात्, ई इति लुप्तप्रोक्तं दम् । द्विशब्दान्तःशब्दौ अनदन्तावेव । अनवर्णान्तेभ्य इति गेर्विशेषणम् । एभ्य इति—द्विशब्दा-दन्तःशब्दादनवर्णान्ताद्गेरित्यर्थः । द्वीपमित्यादि—द्विर्गता आपो यत्र इति वाक्यम् । एवम् अन्तर्गता आपो यत्र, सम्यगापो यत्रेति । एषां रूढ़शब्दत्वादेतद्व्युत्पत्तिमात्रम् । एवमन्वीपं प्रतीपमित्यादि । प्रापमिति—प्रगता आपो यत्र इति वाक्यम् । एवं परापमिति ।

३८८ । समा । निपातो ह्यर्थविशेषे अत आह समापो देवयजनमित्यादि । समीचीना आपो यत्र, अनुगता आपो यत्रेति

३८६। सम् तुम् मनः-कामे, ऽवश्यं ल्ये, ऽन्त्यलोपं, सम्-मांसौ तु हित-तते पाक-पचने वा।

(सम् तुम् ।१॥, मनः-कामे ७।, अवश्यं ।१।, ल्ये ७।, अन्त्यलोप २।, सम्-मांसौ १॥, तु ।१।, हित-तते ७, पाक-पचने ७।, वा ।१।)।

सम् तुम्‌च मनः-कामयोः, अवश्यं ल्ये, अन्त्यलोपं याति, सम् हित-ततयोः, मांसः पाक-पचनयो र्वा।

समनाः सकामः, रन्तुमनाः रन्तुकामः, अवश्यसेव्यः, सहितः संहितः, सततः सन्ततः, मांस्पाकः मांसपाकः मांस्पचनं मांस-पचनम्।

वाक्यम्। अन्यत्र समीपमन्वीपमिति। अन्ये तु समाङ् पूर्व्वादपः समापमिति साधयन्ति।

३८६। सम्। सम् तुम् इति लुप्तप्रोढं, (१) सम् च तुम् च तौ, सौत्रत्वादौलुक्। मनश्च कामश्च तत्तस्मिन्। अन्त्यस्य लोपः अन्त्यलोपस्तम्। सम् च मांसश्च तौ। हितश्च ततश्च तत्तस्मिन्। पाकश्च पचनञ्च तत्तस्मिन्। स इत्यनुवर्त्तते। ल्ये तव्यादौ। हित-तते मांसः पाक-पचने इति पदद्वयकरणात् सम्मांसा-वित्यनेन यथाक्रमं दर्शयति सम् हित-ततयोर्मांसः पाकपचन-योरिति। सकाम इत्यादि—सम्यक् कामो यस्य, सम्यङ् मनो

---

(१) सम् इति तुम् इति च लुप्तप्रथमैकवचनं मनःकामाभ्यां यथासंख्य-निरासार्थमिति दुर्गादास-कार्त्तिकेय-गङ्गाधराः।

३८०। धुरोऽनक्षस्याः।

(धुरः ५।, अनक्षस्य ६।, अः १।)।

राजधुरा। अक्षस्य तु अक्षधूः।

यस्य, रन्तुं मनो यस्य, रन्तुं कामो यस्य इत्यादि वाक्यम्। अवश्य-सेव्य इति—अवश्यं शब्दस्य मयूरव्यंसकादित्वात् ण्यान्तेन सह वा यसः। असे तु अवश्यं सेव्य इति। तथाच भट्टवार्त्तिकं—"सम्ब-न्धानुभवोऽवश्यमेषणीयश्च लिङ्गिन" इति। सहित इत्यादि—सम्यक् हितं प्राप्तं येन इति वाक्यम्। सततमित्यादि—सम्यक् ततमिति प्रादिसः (१)। वाशब्दस्य व्यवस्थावाचित्वात् सातत्य-मित्यत्र नित्यम्। मांसपाक (२) इत्यादि—मांसस्य पाकः, मांसस्य पचनम् इति वाक्यम्। सम्मांसौ त्विति—तुशब्दो भिन्नक्रमार्थ-स्तेन वाशब्दस्य पूर्व्वोक्तैस्त्रिभिर्न सम्बन्धः। अवश्यं गिप्रादुरादि-व्यवधानेऽपि (३)। अवश्यप्रसेव्यः अवश्यप्रादुःसेव्यः अवश्याङ्गीकर-णीय इत्यादि।

३८०। धुरो। धुरः अः स्यात् से, न तु अक्षसम्बन्धिन्याः। राजधुरेति—राज्ञो धूरिति वाक्यं, स्त्रीत्वादाप्। अक्षधूरिति—अक्षस्य धूरिति वाक्यम्। अक्षो रथावयवचक्रसम्बन्धिकाष्ठवि-शेषस्तस्य धूर्भारः। एवं दृढ़धूरक्ष इत्यादि।

---

(१) अत्रापि सम्यक् ततमस्येति बहुव्रीहिरिति दुर्गादास कार्त्तिकेय-गङ्गाधराः।

(२) मांस्पाक इत्यत्र अकारलोपस्य स्थानिवत्त्वान्न विसर्ग इति दुर्गादासः।

(३) अन्त्यलोपं यातीति शेषः।

३९१ । ऋचः । (ऋचः ५।) ।

ऋचः परः अः स्यात् से । अर्द्धर्चम् ।

३९२ । नञ्बह्वोर्माणवक-चरणे ।

(नञ्-बह्वोः ५।, माणवक-चरणे ७।) ।

अनृचो माणवकः, बह्वृचः चरणः । अन्यत्र अनृक् साम, बह्वृक् सूक्तम् ।

३९३ । प्रत्यन्ववात् सामलोम्नः ।

(प्रति-अनु-अवात् ५।, साम-लोम्नः ५।) ।

प्रतिसामं प्रतिलोमम् ।

---

३९१ । ऋचः । अर्द्धर्चमिति—अर्द्धम् ऋच इति वाक्यम् । सप्त ऋचो यस्मिन् सप्तर्चो मन्त्रः ।

३९२ । नञ् । नञ् च बहुश्च तत्तस्मात्, पुंस्त्वं सौत्रत्वात् । माणवकश्च चरणश्च तत्तस्मिन् । नञबहुभ्यां परस्या ऋचः अः स्यात् क्रमात् माणवकचरणयोर्वाच्ययोः (१) । अनृक् सामेति (२) —अक्वतसान्तत्वात् वा के अनृक्कं बह्वृक्कमित्यपि ।

३९३ । प्रत्य । प्रतिश्च अनुश्च अवश्च तत्तस्मात् । एभ्यः पराभ्यामाभ्यामः स्यात् से । प्रतिसाममिति—प्रतिगतं साम इति प्रादिसः, प्रतिगतं साम यस्येति वा हः, साम साम प्रति इति वीप्सायां वा वः । एवं प्रतिलोममिति । एवम् अनुसामम् अनुलोमम् अवसामम् अवलोमम् ।

---

(१) माणवको बटु, चरण वेदशाखा । (२) साम ऋक्च वेदावयविशेषौ ।

३९४ । अक्ष्णोऽचक्षुषि ।

(अक्ष्णः ५।, अचक्षुषि ७।) ।

गवामक्षीव गवाक्षं । चक्षुषि तु विप्राक्षि ।

३९५ । ब्रह्महस्तिराजपल्यात् (१) वर्च्चसः ।

(ब्रह्म—पल्यात् ५।, वर्च्चसः ५।) ।

ब्रह्मवर्च्चसं हस्तिवर्च्चसं राजवर्च्चसं पल्यवर्च्चसम् ।

---

३९४ । अक्ष्णो । अनेत्रार्थादक्ष्नः अः स्यात् से । गवामक्षीव इति (२)—गावो जलानि तेषामक्षीव गवाक्षं पद्मादि, वातायने रूढ़स्तु पुंलिङ्गः (३) । एवं पुष्करमक्षीव पुष्कराक्षं, लवणमक्षीव लवणाक्षं, सर्व्वत्र उपमेयस्य व्याघ्राद्यैरिति यसः । विशालाक्षः पद्माक्ष इति तु हसात् । विप्राक्षीति—विप्रस्य अक्षीति षीषात् ।

३९५ । ब्रह्म । ब्रह्मा च हस्ती च राजा च पल्यश्च तत्तस्मात् । एभ्यः परात् वर्च्चसः अः स्यात् से । ब्रह्मवर्च्चसमिति—ब्रह्मणो वर्च्च इति वाक्यम् । एवं हस्तिवर्च्चसं राजवर्च्चसं पल्यवर्च्च-

---

(१) "अत्र पद्येत्यपपाठ । भाष्ये काशिकावृत्तौ कौमुद्याञ्च पल्येत्येव पठितत्वात् । कौमुदीटीकायां तत्त्वबोधिन्या पल्लं मासमर्हतीति पल्यो मास भोजीति व्याख्यातत्वाच्च । रामतर्कवागीशेनापि पल्येत्येव पठितं व्याख्यातञ्च" इति वृहन्मुग्धबोधम् । सङ्क्षिप्तसारेऽपि पल्येत्येव पाठ. । कातन्त्रे तु पद्ये-त्येव (३८५सू) ।

(२) सादृश्यविशिष्टे लक्षणाज्ञापनार्थमेव इवशब्दः, न तु समासघटकत्वं तस्य—इति गङ्गाधर ।

(३) गावः किरणाः । अक्षिशब्दो रन्ध्रवाची । षष्ठीसमास—इति तत्त्व-बोधिनी ।

३९६ । **समवान्धात् तमसः ।**

(सम्-अव-अन्धात् ५।, तमसः ५।) ।

सन्तमसम् ।

३९७ । **श्वोवसीयस-श्वःश्रेयस-निःश्रेयसम् ।**

(श्वोवसीयस—निःश्रेयसम् १।) ।

एते निपात्याः ।

समिति । वर्च्चस्तेजस्तथाच—"तेजःपुरीषयोर्व्वर्च्च" इत्यमरः । "पलमुन्मानमासयो"रिति रुद्रः । पलमुन्मानमर्हतीति पल्यम्, उन्मानप्रकारेण रच्य द्रव्यमित्यर्थः । सर्व्वस्वे तु पलालरज्ज्वा वेष्टयित्वा व्रीहेरवस्थापन पल्यमित्युक्तम् । यत्र पलालरज्ज्वा व्रीहिं वेष्टयित्वास्थापयन्ति तत् पल्यमिति धातुपारायणम् ।

३९६ । सम । एभ्यः परात् तमसः अः स्यात् से । सन्तमसमिति—सन्ततं व्याप्तं तम इति प्रादिसः । एवम् अवहीनं तमः अवतमसम् । अन्धयतीति अन्धम्, अन्धत्वा दृक्क्षये—अस्मात् पचादित्वादन्, अन्धञ्च तत् तमश्चेति अन्धतमसमिति यः (१) ।

३९७ । श्वो । निपातो ह्यर्थविशेषे, तेन श्वोनिश्भ्यां श्रेयसः श्वसो वसीयश्च शुभे वाच्ये यसे अदन्ता निपात्यन्ते । वसुमत्-शब्दादीयसु, लुङ्महद्विनामिति सतोर्लुक्, ञीमंश्चेति डित्त्वादुकार-लोपे वसीयःशब्दः प्रकृत्या श्रेय आह । श्वोऽनागतेऽह्नि वसीयः

---

(१) यत् तम चक्षु करोति तदुच्यते । * * * अदन्त तमसशब्देन सन्तम-सादिसिद्धौ लक्षणमिद सन्तम इत्यादिरूपनिवृत्त्यर्थम्—इति गोयीचन्द्रः (२३१सू) । ध्वान्ते गाढेऽन्धतमस क्षीणेऽवतमसन्तम । विष्वक् सन्तमसम्—इत्यमर ।

३९८ । तप्तान्ववाद्रहसः ।

(तप्त-अनु-अवात् ५।, रहसः ५।) ।

तप्तरहसम् ।

३९९ । प्रत्युरसानुगवे । (प्रत्युरस-अनुगवे १॥) ।

एते निपात्ये ।

श्वोवसीयसम् (१) । एवं प्रशस्यशब्दादीयसुः श्रेयः, श्वःश्रेयसं निःश्रेयसम् (२) उभयत्र मयूरव्यंसकादित्वात् सः । यद्यपि श्वः-शब्दोऽनागतदिनार्थः वसीयःश्रेयशब्दौ श्रेयोऽर्थौ तथाप्युज्झितावयवार्थेन समुदायेन शुभमाह निपातनात् । निश्चितं श्रेयो निःश्रेयसमिति प्रादिसः ।

३९८ । तप्त । एभ्यः परात् रहसः अः स्यात् से । तप्तरहसमिति—तप्तमिव तप्तं, तप्तञ्च तत् रहश्चेति वाक्यम् । अकथ्यं यद्भवेत् वाक्य तत् तप्तरहसं विदुः इति (३) । एवम् अनुगतं रहः अनुरहसम् । अवकलितं रहः अवरहसमिति प्रादिसः (४) ।

३९९ । प्रत्यु । उरसि प्रतिवर्त्तते प्रत्युरसं, (५) स्यर्थे वः ।

(१) श्वोवसीयसम् कल्याणमित्यर्थ इति कातन्त्रे (२८७ सू.) तन्मते श्ववसीयम् शब्द ।

(२) श्वश्श्रेयसं कल्याणम् । नि श्रेयसं निर्व्वाणमिति कातन्त्रे (२८८ सू.) ।

(३) अथवा—"परेणानधिगम्यं हि यद्रहो रक्षितमयत् ।
तप्तञ्च तद्रहश्चेति तत्तप्तरहसं विदु ॥" इति प्रौढमनोरमा ।

(४) अवहीनं रह इति प्रादिसमास, अथवा अवहीनं निन्दितं रहोऽस्मिन्निति बहुव्रीहि —इति गोयीचन्द्रः । तत्त्वतोविन्यासप्येवमेव । अवगत रह इति दुर्गादास-कार्त्तिकेयौ ।

(५) प्रत्युरसं लोम इति कातन्त्रे (२९० सू.) ।

४०० । **गोरध्वनः ।** (गोः ५।, अध्वनः ५।) ।

प्राध्वो रथः ।

४०१ । **पाण्डूदक्कृष्टात् भूमेः ।**

पाण्डु-उदक्-कृष्टात् ५।, भूमेः ५।) ।

पाण्डुभूमो देशः ।

गवामनुदीर्घम् अनुगवं शकटम्(१) अनोर्दैर्घ्यसामीप्ययोरित्यादिना वः । अन्यत्र उरः उरः प्रति प्रत्युरः, वीप्सायां वः । गवा पश्चात् अनुगु, पश्चादर्थे व' ।

४०० । गोः परादध्वनः अः स्यात् से । प्राध्व इति—प्रगतोऽध्वानमिति वाक्यं, कुप्राद्योर्नित्यमिति सः । प्रगतोऽध्वा येन इति वा हः ।

४०१ । पाण्डू । एभ्यः परस्या भूमेरः स्यात् से । पाण्डूभूम इति—पाण्डुर्भूमिर्यस्मिन् देशे इति वाक्यम् । एव पाण्डुश्चासौ भूमिश्चेति पाण्डुभूमा । उदीची भूमिरस्यां नगर्य्याम्, उदीची चासौ भूमिश्चेति वा उदग्भूमा । कृष्टा भूमिर्यस्या नगर्य्यां कृष्टा चासौ भूमिश्चेति वा कृष्टभूमेति । कृष्टस्थाने कृष्ण इति वदन्ति केचित् (२) ।

---

(१) गौरिव शकटमपि दीर्घमित्यर्थ इति गोयीचन्द्रः ।

(२) पाणिनीयवार्त्तिके काशिकायां संक्षिप्तसारे छन्दोबोधे च कृष्ण इति पाठो दृश्यते । तथाच—

> कृष्णोदक्पाण्डुपूर्व्वाया भूमेरच् प्रत्यय॰ स्मृत' ।
> गोदावर्य्याश्च नद्याश्च सङ्ख्याया उत्तरे यदि ॥ इति कारिका ।

कातन्त्रे तु कृष्टेति पाठ (२८३ सू) ।

४०२ । सङ्ख्याया नदीगोदावरीभ्याञ्च ।

(सङ्ख्यायाः ५।, नदी-गोदावरीभ्याम् ५॥, च ।१।) ।

पञ्चनदं सप्तगोदावरं, द्विभूमः प्रासादः ।

४०३ । निसः शतो डः ।

(निसः ५।, शतः ५।, डः १।) ॥

निस्त्रिंशः निश्चत्वारिंशः ।

---

४०२ । संख्याया । संख्यायाः पराभ्यां नदीगोदावरीभ्यां भूमेश्च अः स्यात् से । पञ्चनदमित्यादि—पञ्चानां नदीनां समाहारः पञ्चनदं, सप्तानां गोदावरीणां समाहारः सप्तगोदावरम् । चकारात् द्वे भूमी यत्रेति ।

४०३ । निसः । निसः परात् शदन्ताड्डः स्यात् से । निस्त्रिंश इति—निर्गता त्रिंशत इति वाक्य (१), क्रान्तादौ निरादेः प्या इति पः । अस्य प एव विषय इति परे । एके तु सामान्य एवेत्याहुः । एवं निश्चत्वारिंशः निष्पञ्चाशः । शत इति किं ? निःषष्टिः निःसप्ततिः इत्यादि ।

गोष्ठश्वाद्या । गोष्ठश्वाद्या निपात्यन्ते । गोष्ठे श्वेव गोष्ठश्वः (२) पुरुषस्यायुः पुरुषायुषं, पौषः (३) । द्वे आयुषी समाहृते द्व्यायुष,

---

(१) निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य, निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्ग इति सिद्धान्तकौमुदी ।

(२) एतेन सप्तमीतत्पुरुष एवेति नियमो दर्शितस्तेन षष्ठीतत्पुरुषे गोष्ठश्वा इत्येव इति तत्त्वबोधिनी ।

(३) द्वन्द्वे न भवति, पुरुषस्य आयुश्च पुरुषायुषी इति काशिका (५।४।७७) समासान्तरे न भवतीति गोयीचन्द्रः (७७५ सू) ।

४०४ । सूत्सुरभिपूते र्गन्धादिर्वातूपमानात् ।

(सु-उत्-सुरभि-पूतेः ५।, गन्धात् ५।, इः १।, वा ।१।, तु ।१।, उपमानात् ५।) ।

सुगन्धिः, पद्मगन्धिः पद्मगन्धः ।

त्रीणि आयूंषि समाहृतानि त्र्यायुषं, समाहारे गः (१) । द्विस्तावा त्रिस्तावा वेदिः, प्रकृते यज्ञे यावती वेदिः करणीयेति कथिता ततो द्विगुणा त्रिगुणा वा अन्यस्मिन् यज्ञे इत्यर्थः । क्रियया सह सामानाधिकरण्यात् द्वित्रिशब्दात् सुच्, तयोस्तावतीशब्देन मयूरव्यंसकादित्वात् सः (२) । एषा विशेषार्थविशेषयोर्निपातनात् गोष्ठस्य श्वा गोष्ठश्वा, पुरुषस्य आयुश्च पुरुषायुषी, द्वयोस्त्रयाणां वा आयुः द्व्यायुस्त्र्यायुर्द्विस्तावती रज्जुरित्यत्र न स्यात् ।

४०४ । सूत् । सुश्च उच्च सुरभिश्च पूतिश्च तत्तस्मात् । एभ्यः पराद्गन्धात् इः स्यादुपमानात्तु वा । सुगन्धिरिति—शोभनो गन्धोऽस्येति वाक्यम् । एवम् उद्गतो गन्धोऽस्य उद्गन्धिः, सुरभिर्गन्धोऽस्य सुरभिगन्धिः, पूतिर्गन्धोऽस्य पूतिगन्धिः । यद्यपि सामान्येनोक्तं तथापि इ एवास्य विषयः । अत्र यदा समवायसम्बन्धेन (३)

---

(१) अद्विगौ तु द्वयोरायुः द्व्यायु—इति गोयीचन्द्र (२८२ सू) ।

(२) तावतीशब्देन तु यावत्यपेक्षेण द्रव्यवृत्तिना सङ्ख्याशब्दस्य सामानाधिकरण्याभावात् विशेषणसमासो न भवतीत्यत आह—मयूरव्यंसकादित्वादिति—इति गोयीचन्द्रः ।

(३) ननु संयोगसम्बन्धेन इत्यर्थः । अतएव परगन्धेन गन्धशब्देन स्यादिति कार्त्तिकेयः । "गन्धस्येत्वे तदेकान्तग्रहणं कर्त्तव्यम्" इति पाणिनीयवार्त्तिकम्

(५।४।१३५)। "एकान्त एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः। सुगन्धि पुष्पं सलिलं च। सुगन्धिर्वायु। नेह—शोभना गन्धा गन्धद्रव्याण्यस्य सुगन्ध आपणिक" इति सिद्धान्तकौमुदी। "एवञ्च गुणवाचिन एवेह ग्रहणं नतु द्रव्यवाचिन इति फलितोऽर्थः। अस्ति च गन्धशब्दो द्रव्यवचन। वहति जलमियं पिनष्टि गन्धान् इयमियमुद्‌ग्रथते स्रजो विचित्रा इति दर्शनात्।

गन्धस्तु सौरभे नृत्ये गन्धके गर्व्वलेशयोः।

स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत॥ इति कोषाच्च।

एतेन 'महीभृतः पुष्पसुगन्धिराददे', 'भग्नबालसहकारसुगन्धौ' इत्यादि व्याख्यातम्। केचित्तु तदेकान्तशब्देन स्वाभाविकत्वं विवक्षित्वा आगन्तुकस्य नेत्याहुः। तथाच भट्टिः—'आम्रायिवान् गन्धवहः सुगन्धः' इति। व्याख्यातञ्च जयमङ्गलाया—गन्धस्येति इकारः समासान्तो न, गन्धस्येत्वे तदेकान्तग्रहणमिति वचनात् सुगन्ध आपणिक इति यथा—इति। अतएव 'भग्नबालसहकारसुगन्धौ' इत्यादीनां प्रामादिकत्वं दुर्घटं वृत्तिकृतोक्तम्"—इति प्रौढमनोरमा। संक्षिप्तसारमतेऽपि गुणवाचिनो गन्धादेव इ प्रत्ययः नतु द्रव्यवाचिनः। तन्मते आम्रायीत्यादि भट्टिप्रयोगे गन्धशब्दस्य द्रव्यवाचित्वात् न इ। तथाच—पृथिव्या एव गन्धवतीत्वात् न गन्धवहो गन्धवान् भवति, किन्त्वरविन्दव्यतिषङ्गवत्त्वात् संयुक्तसमवायेन सुगन्ध इति विशेषणं, तस्मादयं गन्धशब्दोऽरविन्दमाचष्टे। माघे तु 'भग्नबालसहकारसुगन्धौ मधुनि' इति गुणवाच्येव गन्धशब्दः, सहकारद्रव्यसंक्रमणात् मधु गुणवत्। तथाच भट्टवार्त्तिकं—'तिलाद्यम्पकसम्पर्कात् प्राप्नुवन्त्यधिवासताम्। रसानगन्धाःस्पर्शं सर्व्वे साक्रामिका गुणाः'। पवने तु गन्धसंक्रान्तिर्नास्ति तस्यापार्थिवत्वात्। ये तु वैशेषिकादयो गुणसंक्रान्तिं न मन्यन्ते, तन्मते भग्नबालसहकारसुगन्ध इति भवति, अतएव गन्धाद्येति चान्द्रा"—इति गोयीचन्द्र (४६६ सू)। आम्रायीति भट्टी ७।१०, अत्र भरत—सूत्रगभीत्यादौ समवेतस्यैव गन्धस्य ग्रहणम्, अत्र तु परम्परया गन्धसम्बन्धान्न इ प्रत्ययः। सुगन्धिरिति पाठे विकारसघेत्यादिना सुगन्धशब्दात् स्वार्थे णिः। क्वचित्तु समवायाध्याहारात् सुगन्धि समीरण इति प्रयोग इति पाणिनीयाः। आगन्धादेर्वा इति कालापा" इति। मल्लिनाथमते गजदानसुगन्धिना, मधुरयुक्छदगुच्छसुगन्धयः (माघे ६।५०), अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा (नैषधे) इत्यादयः प्रयोगाः कवीनां निरङ्कुशत्वात् सोढव्या इति। (रघौ ४।४५ श्लोकस्य टीका द्रष्टव्या)।

४०५ । नार्च्चायां स्वतेः सख्यादेरः ।

(न ।१।, अर्च्चाया ७।, सु-अति. ५।, सख्यादेः ५।, अः १।) ।

स्वतिभ्यां परात् सख्यादेरो न स्यात् पूजायाम् ।

शोभनो राजा सुराजा, अतिशयेन राजा अतिराजा ।

अर्च्चाया किं ? गामतिक्रान्तः अतिगवः ।

गन्धो वर्त्तते तदेकारस्तथाच--"आघ्रायि वान् गन्धवहः सुगन्ध" इति भट्टिः । कस्तूरिकामृगविमर्द्दसुगन्धिरिति माघे उपमानविवक्षयेति । पद्मगन्धिरिति—पद्मगन्ध इव गन्धो यस्येति वाक्यम् । एभ्यः किं ? दुर्गन्धः ।

भृतित्यादेर्मासादिकः । भृतिर्वेतनं, तत्र विहितो यस्यस्तदन्तादेर्मासादिकः स्यात् से । पञ्चास्य भृतय इत्यर्थे कः, पञ्चको मासोऽस्य पञ्चकमासिकः । एवं दशकमासिक इत्यादि । अस्यापि ह एव विषयः ।

४०५ । नार्च्चायाम् । सुश्च अतिश्च तत्तस्मात् । सखा आदिर्यस्य स तस्मात् । सख्यादेरिति—सख्यहोरात्र इत्याद्यारभ्य (८) सूत्रे येभ्योऽकारो विहित स्तेभ्यः पूजार्थस्वतिभ्या परेभ्यो न अः स्यात् । सुराजा, अतिराजा—कुप्राद्योर्नित्यमिति षः । सख्यादेः किं ? शोभन सक्थि यस्य सुसक्थः, अत्यचो विप्रः । स्वतेः किं ? परमराजः । अन्ये तु पूजार्थस्वतिभ्या परस्याः संख्याया डोऽपि न स्यात् , सुदशा अतिदशा ब्राह्मण इत्याहुः ।

---

(८) गेरध्वग इति पर्य्यन्तेषु—इति दुर्गादास-गङ्गाधरौ ।

४०६। **किमः क्षेपे।** (किमः ५।, क्षेपे ७।)।

किंराजा।

४०७। **नञोऽहवे।** (नञः ५।, अ-ह-वे ७।)।

नञः परात् सख्यादेरो न स्यात्, न तु ह-वयोः।

असखा। ह-वे तु अनपं सरः, अधुरम्।

४०८। **पथो वा।** (पथः ५।, वा ।१।)।

अपथं अपन्थाः। ह-वे तु अपथो देशः, अपथम्।

५०६। किमः। क्षेपो निन्दा, तस्यां वर्त्तमानात् किमः सख्यादेरो न स्यात्। किंराजा, कुत्सितो राजेत्यर्थः। एव निन्दिता धूः यस्य तत् किंधूः शकटम्। क्षेपे किं ? केषां राजा किंराजः।

४०७। नञो। हश्च वश्च तत्, न तत् तस्मिन्। हवभिन्ने से नञः परात् सख्यादेरो न स्यात्। असखेति—न सखा इति वाक्यम्। "नञः" इत्यनेन षसः। यद्यपि नञ इत्यनेनैव सिध्यति, तथापि नञः स्याद्यन्तेन सह ह-वस-ज्ञापनार्थमहव इत्युक्तम्। अनपं सर इति—न सन्त्यापो यस्मिन् सरसीति वाक्यम्। अधुरमिति—धुरोऽभाव इति वाक्यम्।

४०८। पथो। हवभिन्ने से नञः परात् पथः अः न स्याद्वा। अपथमिति—न पन्था इति वाक्यम्। व्यमरव्याभ्यां पथ इति क्लीवत्वम्। पक्षे अपन्था इति। अपथो देश इत्यादि—नास्ति पन्था यस्मिन् देशे, पथोऽभाव इति वाक्यम्।

४०९। कत् क्वाच्त्रिरथवदे।

(कत् ।१।, कु ।१।, अच्-त्रि-रथ-वदे ७।)।

कोः स्थाने कत् स्यात् से अजादौ परे।

कदन्नं कत्त्रयः।

४१०। का ऽक्षे। (का ।१।, अक्षे ७।)।

काक्षम्।

४०९। कत्। अच्च त्रिश्च रथश्च वदश्च तत्तस्मिन्। कदन्नमिति—कुत्सितमन्नमिति वाक्यं, कुप्राद्योर्नित्यमिति षः। एवं कुत्सितास्त्रयः कत्त्रयः, कुत्सितो रथः कद्रथः। कद्वद इति—वदतीति वदः, पचाद्यन्। एष्विति किं? कुब्राह्मणः। अस्य सूत्रस्य षस एवाभिधानात् कुत्सितो रथो यस्येत्यादौ न स्यात्(१)।

जातौ तृणे। तृणशब्दे परे जातौ वाच्यायां कोः कत् स्यात्। कत्तृणं नाम जातिः। अजातौ कुत्सितानि तृणानि।

४१०। का। अक्षशब्दे परे कोः काः स्यात्। काक्षमिति—अक्षमिन्द्रियं, कुत्सितमक्षमिति वाक्य, कुप्राद्योर्नित्यमिति षः। अक्ष इत्यस्य सामान्यतो ग्रहणात् कुत्सिते अक्षिणी यस्य काक्षो विप्र इत्यत्राक्षिशब्दात् षे कृतेऽपि स्यात्।

---

(१) पापकुत्सेषदर्थे कु इत्यमरोक्तस्य अव्ययकुशब्दस्यैवात्र ग्रहणं नतु पृथ्वीवाचकस्य, तेन कौ पृथिव्यां उत्थितः कूत्थित इत्यादौ न स्यादिति दुर्गादास कार्त्तिकेय-गङ्गाधरा।

४११। पथिपुरुषे वा।

(पथि-पुरुषे ७।, वा ।१।)।

कापथं कुपथ, कापुरुषः कुपुरुषः।

४११। पथि। पन्थाश्च पुरुषश्च तत्तस्मिन्। कोः काः स्यात् वा पथिपुरुषयोः परयोः। कापथमिति—कुत्सितः पन्था इत्यर्थः, व्यसंख्याभ्यां पथ इति क्लीवत्वम् (१)। एवं कुपथमिति।

---

(१) अत्र सर्वेषु प्रचलितेषु मुद्रितमुग्धबोधपुस्तकेषु कृते कापथ इति पुंलिङ्ग-पाठो दृश्यते। स च न तर्कवागीशसम्मतः "व्यसंख्याभ्यां पथ इति क्लीवत्वम्" इत्युक्तत्वात्। कार्त्तिकेयोऽपि तर्कवागीशमतमनुसृतवान्। दुर्गादासगङ्गाधर-मते तु पुंलिङ्गपाठः। अत्र पुंस्त्वं न पाणिनीयवार्त्तिकसम्मतम्, "पथः सङ्ख्या-व्ययादेः" इति वार्त्तिके क्लीवत्वस्योक्तत्वात्। सिद्धान्तकौमुद्यामपि क्लीवलिङ्गपाठो दृश्यते। पथः संख्याव्ययादेरिति नपुंसकत्वमिति तत्र तत्त्वबोधिनी। भट्टिप्र-कारेऽपि "कुत्सितः पन्थाः कापथम्। कुपथमित्यसाधुः" इत्युक्तं (२४६ सू)। सङ्ख्याव्ययात् पथ इति नपुंसकत्वम्। कुपथमित्यसाधुरिति—पथिशब्देन समासे नित्यं कादेशः। पथिशब्दसमानार्थेन पथशब्देनापि क्लीवत्वाभाव इत्यभिप्राय इति गोयीचन्द्रः। 'व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः' इत्यमरः, 'व्यध्वो विपथ कापथा विति रभसः, इत्युभयत्रापि पुंलिङ्गपाठो दृश्यते। "पथिन् शब्देन समासे संख्यादीत्यनेन नपुंसकत्वमित्यत अदन्तपथशब्देन समासः। गति पथश्च मार्गश्चेति त्रिकाण्डशेषः"—इत्यमरटीकायां रघुनाथः। प्रौढमनोरमापि अमरवचने क्लीवत्वापत्तिनिरासाय अदन्तपथशब्देन समासमुक्त्वा "स चैव विपथ-सिद्धावपि कापथो न स्यात्, कादेशस्य दुर्लभत्वादिति वाच्यम्। ईषदर्थे च तत्-सम्भवात्, तुल्यायामर्थत पर्यवसानात्" इत्याह। भरतस्तु—कुत्सितः पन्थाः कापथः पथ्यप्युर इति अः। यद्यपि पथः संख्याव्ययात् पर इति क्लीवत्वमुक्तं तथापि लिङ्गस्य लोकाश्रयत्वात् विपथकापथौ पुंस्यपि" इत्याह। प्रौढमनोरमा टीकायां हरिदीक्षितोऽप्येवमाह। अत्रैवं समाधीयते—भरतमते विपथकापथौ पुंस्यपीत्यपिकारात् क्लीवत्वमप्यायाति। अमरे तु कापथ इति निर्देशः अदन्त पथशब्देनापि सिध्यति। तर्कवागीशेनापि तदङ्गीकृतम्। एवं सति पाणिनीय

४१२ । कोरीषदर्थे । (कोः ६।, ईषदर्थे ७।) ।

ईषज्जलं काजलम् ।

४१३ । कत्कवौ चाग्न्युष्णे ।

(कत्-कवौ १॥, च ।१।, अग्नि-उष्णे ७।) ।

कदग्निः कवाग्निः काग्निः, कदुष्णं कवोष्णं कोष्णम् ।

कापथ इति तु ईषदर्थे अकारान्तेन पथशब्देन । परे तु कापथमिति नित्यमाहुः । कापुरुष इति—कुत्सितः पुरुष इत्यर्थः । ईषदर्थे कोः पुरुषशब्दे परे वा कादेश इति भागवृत्तिः, तन्मते ईषत् पुरुषः कापुरुषः कुपुरुष इति ।

४१२ । कोः । पुनः कुग्रहणं पथिपुरुषयोरननुवर्त्तनार्थम्, अत आह काजलमिति । एवम् ईषल्लवणं काल्वणम्, ईषद्वादो यत्र कावाद इत्यादि । ईषदन्नं कान्नम्, ईषदम्ल काम्लम्, ईषदाकारो यस्य स काकार इत्यादौ तु अनेनापि कदादेशो बाध्यते, अपेक्षितविधित्वात् परत्वाच्च(१) । तथाच भारविः—देवाकानिनि कावादे वाहिकास्वस्वकाहि वा । काकारेभभरे काका निस्वभव्यव्यभस्वनि (२) ।

४१३ । कत् । ईषदर्थे कोः कत्-कव-काः स्युरग्न्युष्णयोः

वार्त्तिक सिद्धान्तकौमुदी संक्षिप्तसारादीनामसन्दिग्धमतमनुसृत्य तर्कवागीशटीकानुयायिन्यस्मिन् मुग्धबोधे कापथमिति क्लीबलिङ्गनिर्द्देशमेव युक्तमुत्पश्याम इति ।

(१) कोरीषदर्थे इत्यनेन यत् कादेशविधान तदवश्यमीषदर्थमपेक्षते, तस्मिन्नर्थे एव तद्विधानादित्यपेक्षितविधित्वम् । परत्वादिति—विप्रतिषेधे परं कार्य्यमिति न्यायेन कोरीषदर्थे इत्यस्य परवर्त्तित्वादित्यर्थः

(२) किराते १५।२५ ।

४१४। ज्योति र्जनपद रात्रि नाभि बन्धु गन्ध पिण्ड लोहित कुक्षि वेणी ब्रह्मचारि तीर्थ्य पत्नी पक्षे समानः सः।

(ज्योतिः—पञ्च ७।, समानः १।, सः १।)।

समानं ज्योति र्यस्यासौ—सज्योतिः।

परयोः। कदग्निरिति—परे तु अग्निशब्दे परे का कवादेशौ नाहुः। कदुष्णमिति—अनीषदर्थेऽपि उष्णशब्दे परे कोः कत्-कव-कादेशा इत्यन्ये।

४१४। ज्योति.। एषु चतुर्दशसु परेषु समानस्य सः स्यात्। सज्योतिरिति - समानञ्च तत् ज्योतिश्चेति वाक्यम्, एकादीनाञ्च इति षसः। एवं सजनपद सरात्रिः सनाभिः सबन्धुः सगन्धः सपिण्ड. सलोहित. सकुक्षिः सवेणी। ब्रह्म वेदः, तदध्ययनार्थं यद्व्रत तदपि ब्रह्म, तच्चरतीति ब्रह्मचारी, समानो ब्रह्मचारी सब्रह्मचारी, तस्यैव वेदाख्यस्य ब्रह्मणः सदृशं व्रतं चरतीत्यर्थः। (१) समाने तीर्थे गुरौ वसतीति सतीर्थ्य एकगुरुः, समानतीर्थशब्दात् तत्र वासिनीत्यर्थे यीत्र त्ये समानस्य सः (२)। समानः पतिरस्याः सपत्नी, ईपि पतिशब्दस्य पत्नादेशे समानस्य सः। समानः पक्षः

---

(१) एकव्रतचारी मिथः सब्रह्मचारिण इत्यमरः।

(२) निर्यकारे तीर्थे न स्यात् तेन समानं तीर्थं गङ्गातीरादि येषां ते समानतीर्था इति—इति दुर्गादास-कार्त्तिक-गङ्गाधराः।

४१५। रूप नाम गोत्र स्थान वर्ण वयो वचन धर्म्म जातीयोदर्य्ये वा।

(रूप—उदर्य्ये ७, वा ।१।) ।

सरूपः समानरूपः।

इति स-पादः।

सहायः सपक्षः। परे तु गन्ध पिण्ड लोहित कुक्षि वेणीति पञ्च नाहुः। अन्ये तु पिण्डभिन्नान्नाहुः (२) सेतुशब्दस्याहुः।

३१५। रूप। एषु दशसु समानस्य सः स्याद्वा। सरूप इति—समान रूपं यस्येति वाक्यम्। एवं सनामा सगोत्रः सस्थानः सवर्णः सवयाः सवचनः सधर्म्मा समानः प्रकारः सजातीयः, समान उदरे शयिता इत्यर्थे यः सोदर्य्यः। पक्षे समानरूप इत्यादि। परे तु उदर्य्यभिन्नेष्वपि नित्यमाहुः। धर्म्मोदर्य्यभिन्नेषु वेति चान्द्राः।

अरिष्टादिचिह्नार्थस्य कर्णे घं। रिष्टादिभिन्नस्य चिह्नार्थस्य घंः स्यात् कर्णशब्दे परे। दात्रमिव चिह्नं कर्णे यस्य स दात्राकर्णः। द्वौ गुणौ यस्य स द्विगुणः, तदाकारं चिह्नं कर्णे यस्य स द्विगुणाकर्णः, गुणशब्दोऽत्रावयवार्थः। द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलं, तदाकारं चिह्न कर्णे यस्य स द्व्यङ्गुलाकर्णः। इह चिह्नशब्देन पशूनां स्वामिविशेषसम्बन्धज्ञापनार्थं कर्णे दात्राकारादि

---

(२) पिण्डव्यतिरिक्तान् अपरान् गन्धादीन् चतुरो नाहुः। (४८० सू.)।

यत् क्रियते तस्यैव ग्रहणं, तेन शोभनकर्णः महाकर्ण इत्यादौ न स्यात् । रिष्टादेस्तु रिष्टकर्णः । रिष्टादिर्यथा—

रिष्ट-स्वस्तिक-पञ्चाष्ट च्छिन्न-च्छिद्राणि च स्रुवः ।
भिन्नश्चेतीह रिष्टादावष्ट शब्दाः प्रकीर्त्तिताः ॥

विश्वस्य वसुनि । विश्वस्य घः स्यात् वसुशब्दे परे । विश्वं वस्वस्य विश्वावसुः ।

अपीलवादेरिको वहे । पीलवादिभिन्नस्येगन्तस्य घः स्यात् वहशब्दे परे । वहतीति वहः, पचाद्यन्, कपिं वहतीति कपीवहं मुनीवहं शमीवहम् (१) । पीलवादेस्तु पीलुवहं चारुवहमित्यादि । इकः किं ? गन्धवहः ।

गे' काशे । इगन्तस्य गेः काशशब्दे परे घः स्यात् । निकाशते इति पचाद्यन्, नीकाशः अनूकाशः । इकः किं ? प्रकाशः ।

गेर्वञ्जामनुष्ये बहुलम् । गेर्घः स्यात् घञन्ते परे, न तु मनुष्ये वाच्ये । बाहुल्यात् क्वचिन्नित्यं, क्वचिद्विकल्पः, क्वचिन्निषेधः, क्वचिदन्यत्रापि । यथा अपामार्गः वीमार्गः नीक्लेदः नीहारः नीशारः नीवारः, हृतो प्राकारः, गृहभेदे प्रासाद इत्यादौ नित्यम् । अन्यत्र प्रकारः प्रसादः । प्रतीवेशः प्रतीहारः प्रतीकारः प्रतीरोधः नीकारः अतीसारः परीहासः, पक्षे प्रतिवेश इत्यादौ विकल्पः । प्रवेशः प्रहारः विसारः परिवेशः इत्यादौ निषेधः (२) ।

---

(१) एषूदाहरणेषु "लोकाश्रयत्वात् क्लीवत्वं शब्दस्य" इति गोयीचन्द्रः ।

(२) नीक्लेदः—निक्लिद्यतीति कर्त्तरि घञ् । अपामार्गः—अपमृज्यतेऽनेन इति करणे घञ्, आपाङ् इति ख्यात ओषधिविशेषः । नीहारो हिम ।

पूर्व्वं मुखमस्य पूर्व्वामुखः पश्चिमामुख उत्तरामुखः दक्षिणामुखः इत्यादौ णिभिन्नस्याप्यघजन्तेऽपि। अमनुष्ये किं? निषाद-श्चाण्डालः।

क्विबन्तरुचादौ कस्य च। णेः कस्य (१) च क्विबन्तरुचादौ परे घंः स्यात्। अभीरुक् नीवृत् प्रावृट् परीतत् उपानत्। कस्य—मर्म्मावित् मृगावित् (२)। णिकयोः किं? तिग्मा रुग् यस्य स तिग्मरुक् (३)।

तुरादेः सहि वा तु वेरुद्धयोः। तुरादे घंः स्यात् सहि,

नीघारः प्रावरणम्। नीवारो धान्यविशेषः। प्राकारो वृतावितिवेष्टने वाच्ये। गृहभेदे प्रासाद इति—देवाना भूभुजाञ्च गृहविशेषः। प्रक्रियते इति कर्म्मणि घञ्, प्रसीदन्ति अत्र इत्यधिकरणे घञ्। अन्यत्र प्रकार प्रसाद इति—प्रकारो विशेष, प्रसाद खुश्या दानम्। प्रतीवेशः—प्रतिविशतीति कर्त्तरि घञ्। प्रतीकार—प्रतिकरणमिति भावे घञ्, अथवा प्रतिकुर्व्वन्त्यनेन इति करणे। प्रतीहारः—प्रतिहरन्ति ज्ञापयन्ति तेनेति प्रतीहारो द्वाःस्थः। नीकार—निकरणमिति कॄ श विक्षेपे इत्यस्मात् भावे घञ्। अतीसार—अतिसरणमिति सृ गतौ इत्यस्मात् भावे घञ्। परिहसन परिहासो, भावे घञ्। विसरतीति विसारो मत्स्य—इति गोयीचन्द्र (२।२ सू)

(१) कस्य कारकस्य।

(२) अभिरोचते इति अभिपूर्व्वात् रुच ङ ल दीप्तावित्यस्मात् कर्त्तरि क्विप्, नित्य कुप्रादौरिति समासः। निवर्त्तते इति नीवृत्, निपूर्व्वात् वृत ङ ॡ वर्त्तने इत्यस्मात् कर्त्तरि क्विप्। प्रवर्षतीति प्रावृट् प्रपूर्व्वात् वृषु सेचने इत्यस्मात् कर्त्तरि क्विप्। परितनोतीति परीतत्, यम मन तन इत्यादिना नकारलोप, स्वस्य तन-पितीति तनृ। उपानत् नह्यौ ञ बन्धे क्विप्, नहोधङ् भौ इति धङ्। मर्म्मावित्—मर्म्म विध्यतीति व्यध्यो ताड़े इत्यस्मात् कारकपूर्व्वात् क्विप्, ग्रहस्वपाद्योरिति जिः। एव मृगावित् व्याध।

(३) नात्र उपसर्गपूर्व्वस्य कारकपूर्व्वस्य वा रुचे क्विबन्तता।

वेसु रुहधयोर्वा। तुरः वेगस्तं सहते, ढाङ्जवहसह इति विण्, तुरापाट्। एवम् ऋतीषाट् जलापाट् इत्यादि। विरोहति क्विप्, वीरुहो धङ् क्वौ, वीरुत् विरुत्। रुधधोः क्विपीत्यन्ये। विवधतीति पचाद्यन्, वीवधः विवध इति।

शुनो दन्तादौ। दन्तादौ परे शुनो घंः स्यात्। शुनो दन्तः श्वादन्तः श्वादंष्ट्रा।

दन्तादिर्यथा—

दन्त दंष्ट्रा कर्ण कुञ्ज (१) पद पुच्छाः षड़ीरिताः।

वराहशब्दोऽप्यत्र, एतेन श्वावराहाविति कश्चित्।

पदपुच्छयोर्व्वेति चान्द्राः, तन्मते श्वपदः श्वपुच्छ इत्यपि।

चितेः के। अक्षतसान्तादित्यनेन विहिते के परे चित्यन्तस्य घंः स्यात्। एका चितिर्यस्य एकचितीकः।

कोटरकिंशुलुकाद्यो र्वनगिर्य्यो र्नाम्नि। कोटरादेर्वनशब्दे परे, किंशुलुकादेर्गिरिशब्दे परे घंः स्यान्नाम्नि। कोटराणां वनं कोटरावणम्।

कोटरादिर्यथा—कोटर शारिक सिध्रक पुरगा मिश्र इति पञ्चेह प्रोक्ताः। किंशुलुकाना गिरिः किंशुलुकागिरिः। किंशुलुकाञ्जनभञ्जनलोहितकुक्कुटमिति पञ्चेह प्रोक्ताः। नाम्नि किं? कोटरवनं भञ्जनगिरिः।

विश्वस्य मित्रनरयोः। विश्वस्यानयोर्घंः स्यान्नाम्नि।

---

(१) कुञ्ज इत्यत्र मञ्जिमसारे कुञ्ज इति (२६० सू) काशिकायां कुन्द इति (६।३।२७) पाठभेदो दृश्यते।

विश्वामित्रो नाम ऋषिः, विश्वानरो नाम कश्चित् ।

नाम्नि किं ? विश्वं मित्रं यस्य विश्वमित्रो विप्रः, विश्वे नरा यस्य विश्वनरो राजा ।

अष्टनो वक्रादौ । अष्टनो घं: स्यात् वक्रादौ नाम्नि । अष्ट वक्राणि यस्य अष्टावक्रो नाम ऋषिः, अष्टापदं सुवर्णमित्यादि । नाम्नि किम् ? अष्टवक्रो द्रुमः ।

गोकपालयोर्युक्तहविषोः । गोशब्दे परे युक्ते वाच्ये, कपालशब्दे परे हविषि वाच्ये अष्टनो घं स्यात् । अष्टभिर्गोभिर्युक्तम् अष्टागवं शकटम्, अष्टसु कपालेषु संस्कृतं अष्टाकपालं हविः, उभयत्र तार्थे गः । युक्तहविषोः किम् ? अष्टकपालं विप्रस्य, समाहारे गः ।

इष्टकादेश्चितादौ स्वः । इष्टकादेः स्वः स्यात् चितादौ परे । इष्टकाभिश्चितम् इष्टकचितम्, इषीकायास्तूलं इषीकतूलं, मालां भर्त्तुं शीलमस्य मालभारीत्यादि । तदन्तस्यापि (१) । पक्केष्टकचितं मुञ्जेषीकतूलं, मल्लिकामालभारिण्य इति दण्डी ।

आवीपोर्नाम्नि बहुलम् । आवीपोर्बहुलं स्वः स्यात् नाम्नि । बहुलञ्च क्वचित् नित्यं, क्वचिद्विकल्पः, क्वचिन्निषेधः, क्वचिदपूर्व्वविधिः ।

यदुक्तं —

प्रवृत्तिश्च निवृत्तिश्च विभाषोक्तविधिः क्वचित् ।
अपूर्व्वस्य विधानञ्च बहुलं स्याच्चतुर्व्विधम् ॥

---

(१) पदान्तरपूर्व्वकेष्टकादिशब्दस्यापीत्यर्थः ।

कन्या कुब्जा यस्मिन् देशे कन्यकुब्जो देशः, शिप्रां वहतीति शिप्रवहं, शिप्रा प्रस्थोऽस्येति शिप्रप्रस्थं नगरं, मन्दुरायां जातो मन्दुरजोऽश्वः, रेवती मित्रमस्य रेवतिमित्रः, रोहिण्याः पुत्रो रोहिणिपुत्र इत्यादौ नित्यम् । शिंशपस्थली शिंशपास्थली, प्रमद-वनं प्रमदावनं, रेवतीपुत्रः रेवतिपुत्रः, कालीदासः कालिदास इत्यादौ विकल्पः । लोमकाष्ठं लोमकाण्डं नान्दीकर नान्दी-घोष, नान्दीविशाल इत्यादौ निषेधः । क्वचित् शूद्रकन्य इत्यादौ असंज्ञायामपि, बाहुल्यात् ।

अनीदित्युवूग्यस्य यूनो वा परे । ईप इयुव-ईद्भूतो व्यञ्ज-नान्तस्य ईदूतः ह्रस्वः स्याद्वा परे । ग्रामणीपुत्रः ग्रामणिपुत्रः, वीरबन्धूपुत्रः वीरबन्धुपुत्रः । खलपूकर्कन्धूहन्मुष्टिमिष्वेव हनूभ्यां एव ह्रस्वः, न तु पूर्वयोः, तौ तु नद्यान्तयोगवत्वात् । यथा खलपूश्च कर्कन्धूश्च खलपुकर्कन्धौ, तौ च हनूश्च खलपुकर्कन्धु-हनवः, तासां फलम् खलपुकर्कन्धुहनूफलमिति तु स्यादेव १ । ईवादिषु गार्गीपुत्रः यौवतं भ्रूकुलं शर्मीसूनम् ।

भ्रुवः कुंसादावुदतौ च । भ्रुवः कुंसादौ परे अत् उत् ह्रस्व एते बहुलं स्युः । भ्रुवः कुंसो लालनमस्य भ्रुकुंसः भ्रकुंसः भ्रूकुंसः भ्रूकुंसः इति शब्दार्णवः । एवं भ्रुवो कुटिः भ्रुकुटिः भ्रकुटिः भ्रुकुटिः भ्रूकुटिश्चेति । अन्ये तु त्वामाव इत्याहुः ।

---

१ खलकर्कन्धूहनूनां फलमित्यर्थः ।

तथाच—तन्द्री प्रमीला भ्रकुटि र्भ्रुकुटि र्भ्रूकुटिः स्त्रियामित्यमरः । कुंसः स्याद्भासने पुंसि ।

यङ ईः पुत्रपत्योः षे । ष्यणष्योरनार्षयोरित्यादिना विहितस्य यङ (१) ईः स्यात् पुत्रपत्योः परयोः षे सति । कारीषगन्ध्यायाः पुत्रः कारीषगन्धीपुत्रः, कारीषगन्ध्यायाः पतिः कारीषगन्धीपतिः, एव वाराहीपुत्रः वाराहीपतिरित्यादि । षे किं ? कारीषगन्ध्या पतिर्यस्य स कारीषगन्ध्यापतिर्ग्रामः ।

बन्धौ हे वा तु मातामातृमातृकेषु । यङ ईः स्यात् बन्धौ हे सति, वा तु मातादिषु । कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः, कारीषगन्ध्या माताऽस्य कारीषगन्धीमातः कारीषगन्ध्यामातः, कारीषगन्धीमाता कारीषगन्ध्यामाता, सान्तविधेरनित्यत्वाद्वा कः, कारीषगन्धीमातृकः कारीषगन्ध्यामातृक इति । मातृकशब्दस्य आकारान्तमातादेशो वचनसामर्थ्यात् मनीषादित्वाद्वा । सर्व्वं सुस्थमिति (२) ।

इति श्रीश्रीरामतर्कवागीशभट्टाचार्य्यविरचिता
सपादस्थ टिप्पनी सम्पूर्णा ।

---

(१) २७७ सूत्रस्य टीकायाम् अजादिगणो द्रष्टव्य ।

(२) समासविधि. साकल्येनोक्त इत्यर्थः ।

तद्धितः (त)।

४१६। बाह्वाद्यतोऽत्र्याबादेर्गर्गादेर्नडादेः पितृष्वस्रादेरेवत्यादेः शेषशिवादेः णि-णेय-णाय्र-णायन-णीय-णिक-णा अपत्ये।

(बाह्वाद्यतः ५।, अत्र्याबादेः ५।, गर्गादेः ५।, नडादेः ५।, पितृष्वस्रादेः ५।, रेवत्यादेः ५।, शेषशिवादेः ५।. णि—णाः १।३, अपत्ये ७।)।

एभ्यः परा एते क्रमात् स्युरपत्यार्थे।

४१६। बाह्वा। बाहुरादिर्यस्य सः बाह्वादिः, स च अत्र तत्तस्मात्। अत्रिश्च आप् च तौ अत्र्यापौ, तावादौ यस्य सः अत्र्याबादि. तस्मात्। गर्ग आदिर्यस्य स तस्मात्। रेवती आदिर्यस्य स तस्मात्। शिव आदिर्यस्य सः, शेषश्च शिवादिश्च तत्तस्मात। पुंस्त्वं सौत्रत्वात्। णिश्च णेयश्च णाय्रश्च णायनश्च णीयश्च णिकश्च णश्च ते। एते सप्त दभिन्नेभ्यः (१) सप्तभ्यः क्रमात् स्युरित्यर्थः।

अपत्य इति—अपतनादपत्यं, यो व्यवहितेन जनितः सोऽप्यपत्यं भवत्येवेति। तस्मिन् वाच्ये यस्य सम्बन्धोऽवगम्यते तस्मात् षष्ठ्यन्तात् भवतीत्यर्थः। यद्यपि अपत्ये इति सामान्येनोक्तं

---

(१) बाह्वाद्यत. अत्र्याबादेरित्यादिभिन्नपदेभ्य इत्यर्थः।

तथाप्यभिधानात् गर्गनड़ादिभ्यां गोत्रापत्य एव । तत्र किं गोत्रमिति चेत्, अत्रोच्यते—

पौत्रादि गोत्रमेकस्त्यस्तत्र, लुङ् न भवाद्यचि (१) ।
तस्मादेवास्त्रियां यूनि, तत्र लुङ्, णायनस्तु वा ॥
वश्ये जीवत्यपत्य तु स्यात् पौत्रप्रभृतेर्युवा ।
जीवति भ्रातरि ज्येष्ठे कनीयांस्तु स उच्यते ॥
वृद्धतरे स वान्यस्मिन् सपिण्डे सति जीवति ।
पूज्ये वृद्धं युवा वा स्यात् कुत्साया वा युवाऽयुवा (२)॥

---

(१) भवाद्यर्थविहिते अजादितद्धितप्रत्यये विषये इत्यर्थः । भवादि परत्र स्फुटीभविष्यति ।

(२) छात्राणां बोधसौकर्य्यार्थं तर्कवागीश न्यायपञ्चाननटीकात समुद्धृत्य सुस्पष्टमेकत्र व्याख्यायतेऽयं सन्दर्भः ।

"पौत्रादि गोत्रम्"—पौत्रादि पौत्राद्यपत्यं गोत्रं गोत्रसंज्ञकम् । "एकस्त्यस्तत्र"—तत्र तस्मिन् गोत्रापत्यार्थे एक एव त्य अपत्यप्रत्ययः स्यात् न तु तत्तदपत्य-भेदेन प्रत्ययान्तरोत्पत्तिरित्यर्थः ।"लुङ् न भवाद्यचि"—भवाद्यर्थविहिते अजादि-तद्धितप्रत्यये विषये सति तस्य अपत्यप्रत्ययस्य लुक् न भवतीत्यर्थः । "तस्मादेवा-स्त्रियां यूनि"—यूनि वाच्ये सति तस्मादपत्यप्रत्ययान्तादेव प्रत्ययान्तरं स्यादिति शेषः । स्त्रियां प्रपौत्र्यां वाच्यायां प्रत्ययान्तरोत्पत्तिर्न भवति । "तत्र लुक्"—तत्र तस्मिन् भवाद्यचि विषये युवार्थप्रत्ययस्य लुक् भवतीति शेषः । "णायनस्तु वा"—भवाद्यचि विषये युवार्थप्रत्यययोः ण्यायन णायन्योर्लुक् वा स्यात् । "वंश्ये जीवत्यपत्य तु स्यात् पौत्रप्रभृतेर्युवा"—वंश्ये पित्रादौ जीवति सति पौत्रप्रभृतेरपत्यं प्रपौत्रप्रभृत्यपत्यं युवा युवसंज्ञकं स्यात् । "जीवति भ्रातरि ज्येष्ठे कनीयांस्तु स उच्यते"—यत्र द्वौ प्रपौत्रौ जातौ तत्र ज्येष्ठे भ्रातरि जीवति सति कनीयान् स युवा उच्यते । "वृद्धतरे स वान्यस्मिन् सपिण्डे सति जीवति"—पित्रादौ ज्येष्ठे भ्रातरि चाविद्यमाने किं स्यात् तत्राह वृद्धतरे इति । अन्यस्मिन् वृद्धतरे सम्बन्ध-वयोभ्यां ज्येष्ठे सपिण्डे पितृव्यादौ पितामहभ्रातरि वा जीवति सति स प्रपौत्रः वा

आदैजचा यस्य भवेत् तदादिः
प्राग्देश एङित्यमथ त्यदादि।
वृद्धं तथा गोत्रपरोत्तरं दं
वा नामधेयं प्रणयन्ति वृद्धाः (१)॥

अस्यायमर्थः—यत् पौत्राद्यपत्यं तद्गोत्रं परिभाष्यते (२)। तस्मिन् विवक्षिते भेदेन (३) अपत्य-त्योत्पत्तिप्रसङ्गे नियमः क्रियते एकस्य इति।

तत्र गोत्रे एक एव त्य इत्यर्थः। तथाच एकस्य त्यस्य तत्तदपत्यार्थबोधकत्वमिति। यथा—गर्गस्यानन्तरापत्यं गार्ग्यस्तत्पुत्रोऽपि गार्ग्यस्तत्पुत्रोऽपि गार्ग्य इति।

विकल्पेन युवसंज्ञो भवतीति शेषः। "पूज्ये वृद्धं युवा वा स्यात्"—पूर्व्वोक्तलक्षणेन यस्य युवसंज्ञा न भवति, तदपि प्रपौत्राद्यपत्यं पूज्ये पूजायां वा युवा स्यात्। वृद्धं वृद्धसंज्ञकं यत्, तदपि विकल्पेन युवसंज्ञं स्यात्। वृद्धसंज्ञान्तु वक्ष्यति। "कुत्सायां वा युवाऽयुवा"—कुत्सायां गम्यमानायां युवा वा विकल्पेन अयुवा भवति।

(१) तर्कवागीशटीकायां समुद्धृत्य सुस्पष्टमेकत्र व्याख्यायते वृद्धलक्षणम्। अचां मध्ये आत् ऐच यस्य शब्दस्य आदिः भवेत् तत्, तथा प्राग्देशे प्राच्यदेशाभिधाने एङ् इत्यम्, यस्य शब्दस्य आदिर्भवेदित्यर्थः। अथ त्यदादि त्यदादिगणं, तथा गोत्रपरोत्तरं गोत्रम् अपत्यप्रत्ययः परः येषां, तादृशानि पदानि उत्तराणि उत्तरपदानि यस्य, तादृशं दं पदं वृद्धाः वृद्धं वृद्धसंज्ञकं प्रणयन्ति कथयन्ति। नामधेयं सञ्ज्ञाशब्दं वा विकल्पेन वृद्धं प्रणयन्तीति शेषः।

(२) यद्यपि अपत्यं पुत्र एव रूढं तथापि अपतनादपत्यमिति व्युत्पत्त्या व्यवहितेन जनितेऽपि पौत्रादौ परिभाष्यते। अत्र गङ्गाधरः—यद्यप्यभिधानात् अपत्यशब्दः केवलकन्यापुत्रवाची तथापि न पतति वंशो येन तदपत्यमिति अन्वर्थनिर्द्देशस्तेन अपत्यापत्यमपि अपत्यमुच्यते, अतोऽत्र तात्पर्य्यात् पुत्रपौत्रप्रपौत्रादौ वाच्ये कन्यायाश्च वाच्यायां एभ्य एते क्रमात् स्युरित्यर्थः।

(३) प्रतिव्यक्तिभेदेन।

तस्य गोत्रत्यस्य भवाद्यचि गर्गयस्क इत्यादिना प्राप्तो लुग्न भवतीत्यर्थः । यथा गर्गस्यानन्तरापत्यानां छात्राः गार्गीयाश्छात्राः, एवं यास्कीया वैदीया इत्यादि । भवादीति किं ? गर्ग्येभ्यो हितं गर्गीयम् । अचि किं ? गार्ग्येभ्य आगतः गर्गरूप्य इति ।

गोत्रापत्यस्य ष्णे लोपिनी यूनि ष्णान्तस्य कद्वयोरलुक् । विदानामपत्यं युवा वैदः, विदानामपत्ये युवानौ वैदौ, वैदशब्दात् यूनि वाच्ये ष्णौ कृते ष्णट्नृक्षत्रियेत्यादिना ष्णोर्लुक् । कद्वान्तस्य गोत्रस्य तु यूनि ष्णे लुगभवत्येव । यथा वैदस्य वैदयोर्वा अपत्यानि युवानः विदाः, एवम् उर्वा इत्यादि । ननु यून्यपत्ये विवक्षिते कस्याः प्रकृतेस्त्यो भवतीत्यत आह तस्मादित्यादि ।

तस्मादेव गोत्रादेव युवत्यो भवतीति नियम्यते, स्त्रियां न भवति । यथा—गर्गस्यानन्तरापत्यं गार्ग्यः, गार्ग्यस्यानन्तरापत्यं युवा गार्ग्यायणः, एवं वात्स्यायनः । दक्षस्यानन्तरापत्यं दाक्षिः, तस्यापत्यं युवा दाक्षायणः, एवं प्लाक्षायणः । उपगोरनन्तरापत्यम् औपगवः, तस्यापत्यं युवा औपगविः, एवं कापटविः । नड़स्यानन्तरापत्यं नाडायनः, तस्यापत्यं युवा नाड़ायनिः, एवं चारायणिः । स्त्रियां दाक्षी गार्गीत्यादि ।

तत्रेत्यादि—तत्र भवाद्यचि विषये युव-त्यस्य लुगभवति । यथा फाण्टाहृतस्यानन्तरापत्यं फाण्टाहृतिस्तस्यापत्यं युवा फाण्टाहृतः, सौवीरगोत्रत्वात् फाण्टाहृतिमिमताविति णः, फाण्टाहृतस्य छात्रा इति विवक्षिते णस्य लुकि गोत्रत्यान्तात् ष्णः प्राप्तः, फाण्टाहृताश्छात्राः । एवं भागवित्तस्यानन्तरापत्यं भागवित्तिः,

भागवित्तेरपत्यं युवा भागवित्तिकः, रैवत्यादित्वात् णिकः, तस्य छात्रा भागवित्ता इत्यादि।

णायनस्तु वेति—णायन्निति नान्तनिर्द्देशात् ण्णायनणायन्यो-र्ग्रहणम्। तथाच भवाद्यचि विषये युव-त्यस्यायनो लुग्वा भवति। यथा गार्ग्यायणाना छात्राः गार्ग्यायणीयाः गार्गीयाः, तथा वात्स्यायनीयाः वात्सीयाः, यस्कस्यानन्तरापत्यं यास्कस्तस्यापत्यं युवा, इति तिकादित्वात् णायनि. यास्कायनिः, तस्य छात्रा यास्कायनीया यास्कीया इत्यादि। भवाद्यचि किं? फाण्टाहृत-रूप्य इत्यादि।

प्रसङ्गादाह वंश्ये जीवतीति—वंशे भवो वंश्यः पित्रादिः, तस्मिन् जीवति सति पौत्रप्रभृतेरपत्यं युवोच्यते, गर्गे गार्ग्ये गार्ग्ये च जीवति सति गार्ग्यस्यापत्यं युवा गार्ग्यायणः, नड़ादित्वात् ण्णायनः। तुशब्दोऽत्रावधारणार्थः। युवैव न गोत्रमिति।

असति वंश्येऽपि ज्येष्ठे भ्रातरि जीवति सति कनीयान् भ्राता स युवोच्यते। गार्ग्यस्य द्वौ पुत्रौ जातौ, तयोः कनीयान् युवा, ज्येष्ठो गार्ग्य एव। ज्येष्ठे अविद्यमाने कनीयानपि गार्ग्य एव।

वृद्धतरे इत्यादि—सप्तपुरुषावधयो ज्ञातयः सपिण्डाः, तत्र भ्रातुरन्यस्मिन्नपि सपिण्डे पितृव्ये पितामहभ्रातरि वा वयोधिके जीवति पौत्रादेरपत्य वा युवा भवति। पितृव्ये पितामह-भ्रातरि वा वयोऽधिके गार्ग्यस्यापत्यं गार्ग्यायणो गार्ग्यो वा। वृद्धतराभावे मृते वा गार्ग्य एव।

पूज्य इत्यादि—शास्त्रान्तरे परिभाषणाद्गोत्रं वृद्धं पूजायां वा

युवोच्यते । स भवान् गार्ग्यायणो गार्ग्यो वा । पूजायामिति किं ? गार्ग्य एव ।

कुत्सायामिति—ये ये युवान उक्तास्ते निन्दायाम् अयुवानो वा भवन्ति । गार्ग्यायणो गार्ग्यो वा जाल्म इत्यादि ।

इदानीं वृद्धलक्षणमाह, आदैजित्यादि—अचां मध्ये यस्य आत् ऐच् आदि तद्वृद्धं वृद्धाः प्रणयन्ति । यथा मालाया इदं मालीयम् । शिवस्य विषयो देशः शैवः, तत्र भवः शैवीयः, औपगवीय इत्यादि ।

प्राग्देशाभिधानेऽचां मध्ये एङादि यत् तद्वृद्धम् । यथा—एनीपचनो देशस्तत्र भव एनीपचनीयः । एवं गोनदीयः भोजकटीयः, गोमतीया मत्स्याः । एङिति किम् ? अहिच्छत्रे भवः आहिच्छत्रः, कान्यकुब्जः । प्राग्देश इति किं ? देवदत्तो नाम वाहीकग्रामः, तत्र भवः देवदत्तः, गोमतामिदं गौमतम् (१)।

प्राग्देशस्तु—

प्रागुदीच्यौ विभजते हंसः क्षीरमिवोदकम् ।
विदुषा शब्दसिद्ध्यर्थं सा नः पातु शरावती (२) ॥

त्यदादिरपि वृद्धमुच्यते । त्यत्र भवस्त्यदीयः, अस्मदीय इत्यादि ।

तथेति—एव गोत्र ण्यादि परं येषा तानि गोत्रपराणि(३) उत्तराणि यस्य तद्गोत्रपरोत्तरं, दमित्यस्य विशेषणम् (४) । यथा

---

(१) अत्र गोमच्छब्दस्य तद्देशवासिवाचकत्वात् न वृद्धसंज्ञा ।

(२) शरावती नदीविशेषः ।

(३) पदानीतिशेषः । (४) ईदृशं पद वृद्धसंज्ञकमित्यर्थः ।

४१७ । णित्ते त्रिराद्यचः सुभग-सुपञ्चालाद्योस्तु द्वान्त्यदानाम् ।

(णित्ते ७।, त्रिः १।, आद्यचः ६।, सुभग-सुपञ्चालाद्योः ६॥, तु ।१।, द्वान्त्यदानां ६॥।)।

अचां मध्ये आद्यचो त्रिः स्यात् णिति ते परे, सुभगादेस्तु द्वयोर्दयोः, सुपञ्चालादिस्तु अन्त्यस्य दस्य ।

शुङ्गगार्ग्यस्यायं शुङ्गगार्गीयन्द्याव: । एवं वृद्धकाश्यपीय इत्यादि । परे तु जिह्वाकात्य हरितकात्ययोर्वृद्धत्वं नेच्छन्ति, तेन जैह्वाकातः हारितकात इति ।

नामधेयं वा वृद्धमुच्यते । यथा—यज्ञदत्तीयः याज्ञदत्त इत्यादि । एतास्तिस्रः सञ्ज्ञा (१) यथायथं विशिष्य तत्तल्लक्षणेषु वक्तव्या इति ।

४१७ । णित्ते । ण इद्यस्य स णित्, णिश्चासौ तश्चेति णित्तस्तस्मिन्, आदिश्चासौ अच्चेति आद्यच् तस्य, सुभगश्च सुपञ्चालश्च तौ, तावादी ययोः तौ सुभगसुपञ्चालादी तयोः, द्वे च अन्त्यश्च तानि, तानि च तानि दानि चेति द्वान्त्यदानि तेषाम् । आद्यच इति अजपेक्षया बोद्धव्यम् । अन्यथा आग्निशर्म्मिः औपगविः इत्यादिष्वेव स्यात् न तु कार्ष्णिरित्यादौ, अच आदित्वाभावात् इत्याह अचां मध्ये आद्यच इति । औडुलोमिः औडुलोमौ उडुलोमाः । एवं शवललोमिः शवललोमौ शवललोमाः । ञ्ये तु गेपादित्वात् अनित् णः ।

---

(१) गोत्र युव-वृद्धरूपा ।

(३३८) न्वोर्लोपौती तेऽच्ये। बाह्वोरपत्यं बाह्वविः, उप-
वन्दोरपत्यम् औपविन्दविः, उडुलोम्नोऽपत्यम् औडुलोमिः,
ग्निशर्म्मणोऽपत्यम् आग्निशर्म्मिः। कृष्णस्यापत्यं कार्ष्णिः।

बाह्वादिर्यथा—

बाहुः कुनामोपचाकु शिवाकान्तरहन्मतम् (१)।
भद्रशर्म्माग्निशर्म्माणौ देवशर्म्मा च काश्यपः॥
युधिष्ठिरार्ज्जुनौ रामः कृष्ण-प्रद्युम्न-केशवाः।
शाल्वो दशरथोऽनड्वान् पञ्च-सप्ताष्ट-लक्षणः॥
क्षेमधूर्त्तेन्द्रशर्म्माणौ गद-माय-शराविणौ।
शङ्खभेदि-सुनामानौ सेन-लोम-शिरोऽन्तदाः (२)॥
ण्णौ शीर्षःशिरस(३)श्चाथ चटाकु-खरनर्हिनौ।
पुष्करसद्जीगर्त्त(४)द्रोण-जीवन्त-पर्व्वताः॥
अजधेनुश्च मण्डूक उदङ् नगरनर्हिनौ।
चूडा सुमित्रा दुर्म्मित्रा भगला छगला तथा॥
ध्रुवका ध्रुवका जङ्घा हिडिम्बा चैव मूषिका।
सवर्णा शकला चैव नगनः कारुवाचिनः॥
उदञ्च श्वशुरौ नाम्नि, वेद-प्राकारनर्हिनौ।
सस्य लोपो भवेत् ण्णौ च सङ्कूयोऽम्भोऽमितौजसाम् (५)॥

(१) कुनामन् उपचाकु शिवाकु अन्तरहन्।
(२) सेनान्त लोमान्त-शिरोऽन्तानि पदानीत्यर्थ।
(३) ण्णौ परे शिरसः स्थाने आदिष्टशीर्षान्तशब्द इत्यर्थ।
(४) पुष्करसद् अजीगर्त्त इति द्वयम्।
(५) सङ्कूयस् अम्भस् अमितौजस्—एषां ण्णौ परे सलोपो वक्तव्य इत्यर्थ।

अकौशिके शलङ्कुश्च लोपः ष्णौ ष्णायनेऽप्युतः ।
उपविन्दुर्व्यास-विश्वौ निषाद-वरुड़ौ तथा ।
षट् सुधाता च चण्डालो व्यासादौ परिकीर्त्तिताः ॥

इह केषाञ्चिदप्राप्ते पाठः, अदन्तानां ण्णिबाधकबाधनार्थः । अन्तरङ्गतोऽपत्यम् आन्तरङ्गातिः, सुभगादित्वात् द्वयोर्व्रिः ।

काश्यपस्य त्रिषु (१) पाठात् काश्यपिः काश्यपेयः काश्यपः । युधिष्ठिरादिद्वयोः कुरुवंशत्वात्, रामादिपञ्चानां वृष्णिवंशत्वात् शिवादिष्णबाधनार्थः । दशरथस्योभयत्र (२) पाठात् दाशरथिः दाशरथ', तथा च "प्रदीयतां दाशरथाय मैथिली"ति । उभयत्र(३) अनडुहः पाठात् आनुडुहिः आनुडुह्यः । लक्षणशब्दस्य इह कुर्व्वादौ (४) च पाठात् लाक्षणिः लाक्षण्यश्च । एवं सेनान्तानां (५) हारिषेणिः हारिषेण्यः । सहस्रशिरसोऽपत्यं साहस्रशीर्षिः ; ष्णौ शिरसः शीर्षादेश', एवं हास्तिशीर्षिरित्यादि । पुष्करसदोऽपत्यं पौष्करसादिः, सुभगादित्वाद्द्वयोर्द्वयोर्व्रिः । द्रोणादित्रयाणाम् उभयत्र(६) पाठात् द्रौणिः द्रौणायनः, जैवन्तिः जैवन्तायनः, पार्व्वतिः पार्व्वतायनः । मण्डूकशब्दस्य त्रिषु पाठात् माण्डूकिः माण्डूकेयः माण्डूकः । उदीचोऽपत्यम् औदञ्चिः, मनीषादित्वात् उदञ्चादेशः । मूषिकाशब्दस्य इह गोधादौ च पाठात् मौषिकिः मौषिकारः । सवर्णाया उभयत्र (७) पाठात् सावर्णिः सावर्णिकः । कारुवाचि-

(१) वाह्वाद्यत्रादिशिवादिषु ।
(२) बाह्वादौ शिवादौ च ।
(३) बाह्वादौ गर्गादौ च ।
(४) यक्ष्यमाणकुर्व्वादिगणे ।
(५) उभयत्र पाठादिति शेषः ।
(६) बाह्वादौ नड़ादौ च ।
(७) बाह्वादौ रेवत्यादौ च ।

४१८। य्वोर्युम् दान्तेऽस्वङ्ग-व्यङ्ग-व्यड़-व्यवहार-व्यायाम-स्वागत-स्वध्वर-णनः।

(य्वोः ६॥, युम् ।१।, दान्ते ७।, अस्वङ्ग—णनः ६।)।

आद्यचः स्थाने जातयोर्दान्ते स्थितयोर्यवयोः स्थाने क्रमादि-युमौ स्तो णिति ते परे, न तु स्वङ्गादेः।

नाम् इह कुर्व्वादौ च पाठात् तान्तुवायिः तान्तुवाय्यः, नापितिः नापित्यः। उदङ्को नाम कश्चित्, तस्यापत्यम् औदङ्किः, अदन्तत्वात् प्राप्ते यौगिकशब्दान्निषेधार्थः पाठः। एवं श्वाशुरिः। नाम्नीति किम्? औदङ्कः श्वशुर्य्य (१), तथाच—"श्वशुर्य्यौ देवरश्यालौ" इति। सङ्कूयसोऽपत्य साङ्कूयिः, णौ सलोपः। एवम् आम्भिः, आमितौजिः। इहाकौशिके शलङ्कुः पठ्यते, कौशिके तु नडादौ। तथाच णौ णायने च उतो लोपो भवति। तेनाकौर्शिके शालङ्किः, कौशिके शालङ्कायनः।

४१८। य्वोर्युम्। य च व च तौ तयोः, इश्च उश्च यू, ताभ्यां ममितं करोति, युम्। दस्यान्तो दान्तस्तस्मिन्। स्वङ्गश्च व्यङ्गश्च व्यडश्च व्यवहारश्च व्यायामश्च स्वागतश्च स्वध्वरश्च णन् च तत्, न तत् अस्वङ्गव्यङ्गव्यड़व्यवहारव्यायामस्वागतस्वध्वरणंस्तस्य। पूर्व्वसूत्रादाद्यच इत्यनुवर्त्तयन्नाह आद्यच इति। णित्ते आदौ इमुमि कृते पश्चादृद्धिः। उदाहरणानि वैयश्विरित्यादीनि वक्ष्यति। आद्यच इति किं? दधिप्रियोऽश्वः मधुप्रियोऽश्वः शाकपार्थिवादि-

---

(१) कुर्व्वादेरपिदित्यादि वक्ष्यमाणवार्त्तिकसूत्रेण य।

४१८ । द्वार स्वर स्वः स्वस्ति स्वादुमृदु व्यल्कस श्वः श्वन् स्फाकृत स्व स्वाध्याय स्वग्रामैकन्यग्रोधानां श्वापदन्यङ्कोस्तु वा न त्विति श्वादेः ।

(द्वार—न्यग्रोधानां ६।।।, श्वापद-न्यङ्कोः ६।, तु ।१।, वा ।१।, न ।१।, तु ।१।, इति ७।, श्वादेः ६।) ।

द्वारादेरद्वितीयस्य न्यग्रोधस्य च य्वोर्युम् स्यात्, श्वापदन्यङ्कोस्तु वा, न तु श्वादे-रिकारादौ ते ।

वैयश्विः सौवश्विः । स्वङ्गादेस्तु स्वाङ्गिः व्याङ्गिः व्याडिः ।

त्वान्मध्यपदलोपे दध्यश्वः मध्वश्वः, तस्यापत्यं दाध्यश्विः, एवं माध्वश्विः । दान्ते इति किम् ? इन ल गतौ गत्ल यत्, तस्येदं णे यातमित्यादि । ननु कथं द्वाशीतिक इति चेन्न, (१) सुपद्मालादिपाठेन पूर्व्वपदस्यानिमित्तत्वात् (२) ।

४१८ । द्वार । एकश्चासौ न्यग्रोधश्चेति एकन्यग्रोधः, दान्तरानुपलक्षित इत्यर्थः (३) । द्वारश्च स्वरश्च स्वश्च स्वस्ति च स्वादुमृदुश्च व्यल्कसश्च श्वश्च श्वा च स्फाकृतश्च स्वश्च स्वाध्यायश्च स्वग्रामश्च एकन्यग्रोधश्च ते तेषाम् । श्वापदश्च न्यङ्कुश्च तत्तस्य, पुंस्त्वं सौत्र-

---

(१) द्व्यशीतिशब्दात् कथं यकारस्य स्थाने इम् न स्यादित्याशङ्कायाम् सुपद्मालादीति ।

(२) पूर्व्वपदस्य अनिमित्तत्वात् वृद्धिनिमित्तोऽभूतत्वान्निषेधादित्यर्थः । अत्र गर्ग्गादिति "व्यतीहारे णच् स्त्री"ति विहितो णच् तदन्तस्य न स्यात्, तदन्तस्य च स्वार्थे ण्य इति वक्ष्यति । तेन व्यावहारी व्याक्रोशीत्यादि ।

(३) पदान्तरेणाक्षतसमास इत्यर्थः ।

४२० । व्यासादेर्ङक् णौ (१) ।

(व्यासादेः ६।, ङक् ।१।, णौ ७।) ।

वैयासकिः सौधातकिः ।

आत्रेयः शौभ्रेयः ।

त्वात् । स्वा आदिर्यस्य सः स्वादिस्तस्य, आदि: पूर्व्वः (२) । एतेषां यवयोरदान्तत्वात् आद्यच: स्थानेऽजातत्वाच्च पूर्व्वेणाप्राप्ते वचनमिदम् । पूर्व्वसूत्रोदाहरणमाह वैयश्विरिति—विगतोऽश्वो यस्य स व्यश्वः, तस्यापत्यमित्यर्थेऽदन्तत्वात् णिः, यस्यादाविम् पश्चात् त्रिः । एवं शोभनोऽश्वो यस्य स स्वश्वः, तस्यापत्य सौवश्विः । प्रत्युदाहरति—स्वाङ्गिरिति, शोभनमङ्गं यस्य स स्वङ्गः, तस्यापत्यम् इत्यादि वाक्यम् ।

४२० । व्यासा । व्यास आदिर्यस्य स तस्य । व्यासादेर्ङक् स्यात् णौ परे । वैयासकिरित्यादि—व्यासस्यापत्य, सुत्रानुरपत्यम् इत्यादि वाक्यम् । ङित्वादन्त्यस्याक् । एवं वैयग्रकिः नैषादकिः वारुड़किः चाण्डालकिरिति । एषामृष्यन्धक-वृष्णिकुरुभ्यस्येति णो प्राप्ते बाह्वादौ पाठः । येऽत्र (३) गोत्र [illegible] प्रसिद्धास्तेभ्यो गोत्रवाचित्वे णिः, तेन बाहुनाम [illegible] पत्यं बाहव इत्यादि ।

(१) व्यासादिर्बाह्वादयन्तर्[illegible]

(२) पदान्तरेण [illegible]
अनुप्रभृतिशब्दाना [illegible]

(३) बाह्वादौ ।

एव-ट्र-क्षत्रियार्षेभ्यो युव-णेर्लुक् । एवात् ट्रात् क्षत्रियात् आर्षाच्च यून्यर्थे णेर्लुक् स्यात् । कुरोर्ब्राह्मणस्यापत्यं कौरव्यः (१) तस्यापत्यं युवा कौरव्यो (२) ब्राह्मणः । क्षत्रिये तु कौरव्यायणिः । ट्रात्—विदस्यापत्यं वैदः तस्यापत्यं युवा वैदः । एवमौलः । क्षत्रियात्—श्वफल्कस्यापत्यं श्वाफल्कः तस्यापत्यं युवा श्वाफल्कः । एवं वासुदेवः आनिरुद्ध इत्यादि । आर्षात्—वशिष्ठस्यापत्यं वाशिष्ठः तस्यापत्यं युवा वाशिष्ठः । एवं वैश्वामित्रः । भर्गशब्दो नड्डादिः, त्रैगर्त्ते (३) भर्गस्यापत्यं भार्गायणः, त्रैगर्त्तातिरिक्ते भर्गस्यापत्यं भार्गिः तस्यापत्यं युवा भार्गायण इति ।

आत्रेय इति—अत्रेरपत्यं ण्येयः, तेर्लुकि ययोर्लोपः, त्रि । शौभ्रेय इति—शुभ्रस्यापत्यमिति वाक्यम् ।

अत्र्यादिर्यथा—

अत्रिः शुभ्र-सुनाम-दत्त-शवलाः गालूक-जिह्वाशिनौ (४) ।
शाकम्भर्यन्तराजवस्ति-शकलाः कर्पूर-वीणाग्निनः (५) ॥
विश्वक्रान्ति शलाशला-परिवयः कद्रुः खड्डूरोऽङ्गिरः ।
श्वार्णावौ भरतौ मृकण्डु-कतलामौ भारताग्वौ दिशः (६) ॥

---

(१) अत्र कुरुशब्दात् कुर्वादित्वात् ण्यप्रत्ययः ।
(२) अत्र कौरव्यशब्दात् ञिप्रत्यये ट्वादेन लुक् ।
(३) अत्र त्रैगर्त्तिस्त्रिगर्त्तस्य मुनेरपत्यमिति ।
(४) सुनाम्न् जिह्वाशिन् ।
(५) शाकम्भिन् अन्तर अजवस्ति शंस अग्निन् ।
(६) भरत् अर्णावभारत अज दिश् ।

गङ्गा विमाता विधवा शलाका
किशोरिका विष्टपुरी मयूरः ।
प्रवाहणालीढ़-सुदत्तमश्म-(१)
कुमारिकाशोक-सुदत्त-गोधाः (२) ॥
वायुदत्त-शलाकाभ्रू-लेखाभ्रू-गन्धपिङ्गलाः (३)।
अन्तर्दृष्टी बलीवर्दी हरितौ (४) विश्वचित्तथा ॥
शतद्वारः शताद्वारः खरोन्मत्ता कुवेरिका (५) ।
रुक्मिणी रोहिणी ब्रह्मकृताकाशायनौ (६) हरः ॥
विश्रो, भ्रुवो भ्रुवः ण्येये, वाशिष्ठे श्यामलक्षणौ (७) ।
अण्यये द्व्यजिकारान्ता (८) वड़वा शुक्ले मता (९) ॥
विकर्णः काश्यपे प्रोक्तस्तथैव हि कुषीतकः (१०) ।
अम्बिका च चतुष्पादः पाण्डु-मण्डूक-दुष्कुलाः ।
मातापितृष्वसुः ण्येयो डकारेदर्दितिर्दितिः ॥
अत्रिशब्दस्य ऋषिवाचकत्वात् णो प्राप्ते पाठ.। अत्रादन्ताना

---

(१) प्रवाहण आलीढ़ सुदत्त अश्मन् ।
(२) कुमारिका अशोक ।
(३) अत्र गन्धपिङ्गला अन्यत्र शुद्धपिङ्गला इत्यपि पाठः ।
(४) एते त्रय इनन्ता । अन्तर्दृष्टिन् इत्यत्र अनुदृष्टिन् इत्यपि पाठ ।
(५) खडोन्मत्ता इति कुबेणिक इति च पाठ ।
(६) ब्रह्मकृत आकाशायन ।
(७) वाशिष्ठे वाच्ये श्यामलक्षणशब्दाद्यञादौ ।
(८) णिप्रत्ययान्तभिन्ना द्विस्वरविशिष्टा इकारान्ता हरिप्रभृतय इत्यर्थ ।
(९) शुक्लप्राचुर्यविशिष्टार्थे वडवाशब्दोऽश्वादिर्नान्यत्र ।
(१०) विकर्णशब्दः कुषीतकशब्दश्च काश्यपे वाच्येऽश्वादिः ।

पाठोऽनः शिवाद्यनार्थः। शलाघ्नलादिशब्दानां आवीवन्तानाम् अवृद्धानां (१) नदीमानुषीसंज्ञकानां शिवादित्वात् ष्णे प्राप्ते पाठः। शलाघ्नलः इत्यत्र नामनि शलायलशब्दोऽपीति कश्चित्। इह कद्रुशब्दः पिङ्गलवर्णार्थकः। तथाच मेदिनिः—“कद्रूस्त्रिषु स्वर्ण-पिङ्गे नागानां मातरि स्त्रियाम्” इति। हकलाम-रोहिणी-अजवस्तिप्रकृतयो येऽव चतुष्पाज्जातिवाचिनस्तेषाम् अचतुष्पाज्जातिवाचकत्वेऽपि ण्येयार्थः पाठः। विधवाशब्दस्याबादित्वात् ण्ये सिद्धे पाठः यदा दुःशीलाभिधायी तदैव बाधनार्थः। प्रवाहण-शब्दस्य सुभग-सुपञ्चालायोः पाठात् प्रावाहणेयः प्रवाहणेयः। गोधाशब्दस्य पाठो गोधाशब्दादेरारस्यानित्यत्वज्ञापनार्थः। भ्रुवोऽपत्यं भ्रौवेयः, ष्णेये भ्रुवादेशः। भ्रुव इति किं? शालाकास्नेयः लैखाभ्रेयः, ष्णेये श्रोत्रीय.। श्यामेयो वाशिष्ठ., लाक्षणेयो वाशिष्ठ.; अन्यत्र श्यामायनः लाक्षणायणिः लाक्षण्यः। अणुप इत्यादि—हरेरपत्यं हारेयः, एवं वैधेयः गालेय इत्यादि। अणुप इति किं? दाक्षेरपत्यं दाक्षायणः, प्लाक्षायणः। द्यच इति किं? मारीचः मौकुचः। वडवाया अपत्यं वाडवेयः शकुनः, अन्यत्र वाड्वः। वैकर्णेयः काश्यपः, कौषीतकेयः काश्यपः; अन्यत्र वैकर्णि. कौषीतकिः। चतुष्पाद इति—कमण्डलुश्चतुष्पदजाति-विशेषः, तस्यापत्यमिति ष्णेये उक्तोपायं सूत्रमाह।

---

(१) मारिमापिकहकर्षप्रकशिदानाम्।

४२१ । ओर्लोपोऽकद्रुपाण्डोरेये ।

(ओः ६।, लोपः १।, अकद्रु-पाण्डोः ६।, एये ७।) ।

उवर्णस्य एये परे लोपः स्यात् न त्वनयोः ।

कामण्डलेयः । तयोस्तु काद्रवेयः पाण्डवेयः । गाङ्गेयः (१) ।
माह्वेयः यौवतेयः ।

---

४२१ । ओर्लो । कद्रुश्च पाण्डुश्च तत् कद्रुपाण्डु तस्य । पुंस्त्वं सौत्रत्वात् । अनेन उकारलोपे कामण्डलेयः, एवं शितिबाहोरपत्यं शैतिबाहेयः । काद्रवेय इति नागमातृवाचकस्य नेह (२) ग्रहणं, तस्योवन्तत्वात् ढेयप्राप्तेः(३) । पाण्डवेय इति । शिवादित्वात् ष्णे पाण्डवः । दौष्कुलेयः दौष्कुलीनः । मातृष्वसृपितृष्वसृभ्यां ष्णेयो डित्, मातृष्वसेयः पैतृष्वसेयः, पितृस्वस्रादित्वात् मातृष्वस्रीयः पैतृष्वस्रीयः । अदितेरपत्यम् आदितेयः, कुर्व्वादित्वात् आदित्यः, एवं दैतेयः दैत्यः । आकृतिगणोऽयम् ।

आवाप्युदाहरति माह्वेय इति—मह्या अपत्यम् इति वाक्यम् । एवं यौवतेयः (४) सौपर्णेयः कौम्भकारेयः । अनिताका णौं गृह्यते, तेन जम्ब्वा अपत्यम् जाम्बेयः (५) ।

---

(१) मूले गाङ्गेय इत्यत्र तर्कवागीशमते शुभ्रादित्वात् ढेय ।

(२) इह शुभ्रादौ । (३) २८० सूत्रस्य टीका द्रष्टव्या ।

(४) युवतेरपत्यं यौवतेय । अत्र युवत्यनड्वाहीति निपातस्तत्रैव युवन् शब्दात् कृतस्य तिप्रत्ययस्यापि शुभ्रादित्वात् ढेय । पाङ्गोपाद्यात्यनेन पक्षे ईपि कृते तु युवत्या अपत्यं यौवतेय । अत्र ईबन्तत्वात् सुतरां ढेय इति दुर्गादास-कार्त्तिकेयौ ।

(५) इह जम्बोदाहरणे कामण्डलेय इत्यपि बोध्यम् । तत्र कमण्डलूर्नाम काचित्, तस्या अपत्यमिति ढेय ।

४२२। कल्याणी सुभगा दुर्भगा बन्धकी रजकी बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्र्यनुसृष्ट्यनुदृष्टि कुलटाभ्य इनेयः।

(कल्याणी—कुलटाभ्यः ५।।। इनेयः १।)।

सौभागिनेयः दौर्भागिनेयः।

द्व्यचोऽनद्याः। नदीवर्जितात् स्त्र्यात्यान्तात् द्व्यचः ण्येयः स्यात्। दात्तेयः गौधेयः। अनद्या इति किम्? गोणा गोदावरी गौणः(१)। अड्वाख्यो नदीमानुषीसंज्ञाख्य इति णे प्राप्ते(२) ण्येय-विधानम्। एतत् (३) ग्रन्थकृता मार्द्रेय इत्युदाहरणेन ज्ञापितम्।

४२२। कल्याणी। कल्याणी च सुभगा च दुर्भगा च बन्धकी च रजकी च बलीवर्दी च ज्येष्ठा च कनिष्ठा च मध्यमा च परस्त्री च अनुसृष्टिश्च अनुदृष्टिश्च कुलटा च ताः ताभ्यः। जरतीस्थाने रजकीति लिपिकरप्रमादः, जिनेन्द्रबुद्धिपाठेन दुर्बोधत्वेन भावितत्वात्। एष्वचतुर्दशस्य पूर्व्वस्मिन्नप्यनिर्दिष्टस्य णेयस्य निविधरिणामात् इनेयः स्यात्, पकारणकारं वितेवादेशः (४)। अतएव पित्वादीप् णित्वाद्वृद्धिः (५) तेन काल्याणिनेयीत्यादि।

---

(१) अतएव सूत्रे गाङ्गेय इति आरब्धोदाहरणं न सङ्गच्छते गङ्गाशब्दस्य नदीवाचकत्वात्।

(२) जिनदौ "अङ्ग्वा मानुषीसंज्ञा नदीसंज्ञा मता इह" इत्युक्तेः णित्यादिष्ट णे प्राप्ते इत्यर्थः।

(३) एतत् द्व्यचोऽनद्या इति सूत्रस्थोऽनद्याग्रहणम्।

(४) एकस्य इत्येव आदिदेशः।

(५) व्याप्तिरुक्तैरवधिष्कार्यं निरूढीति कान्तिकेयः।

इतो लुगिनेयस्य परस्त्रियाः। परस्त्रीशब्दात् परस्य इनेयस्य इतो लुक् स्यात्। पारस्त्रैणेयः, सुभगादित्वात् दद्वयोर्वृद्धिः (१)। इह सत्यर्थकुलटाया ग्रहणं, तेन सत्याः कुलटाया अपत्यं कौलटिनेयः, अत्र्यादेराकृतिगणत्वात् ष्णेयः। असत्यास्तु कौलटेरः कौलटेयः। सौभागिनेय इति। सुभगादिर्यथा—

भग जङ्गल हृत् सिन्धु धेनु वलजदोत्तराः (२)।
वध्योगोऽगारवेणुश्च (३) शतकुम्भ-परस्त्रियौ॥
इह-सर्व्व-परादिस्तु लोकः (४) प्रयोग इत्यपि।
असिहत्या चतुर्व्विद्या कुरुपञ्चाल एव च॥
अधिदेवाधिभूतौ च, ण्ये राजपुरुषो मतः।
सर्व्वात् पुरुषभूमी च तथातान्तरहृत् स्मृतः (५)॥
अन्वादिशतिकोऽपि (६) स्यादनुसंवत्सरो मतः।
अस्यहेत्यस्यहत्यौ (७) च तथा कुरुकतो मतः॥
स्याद् पुष्करसदित्येव सूत्रपूर्व्वनडः स्मृतः (८)।
अभिगमोऽनुह्रोडश्च प्राग्देशनगरान्तदाः (९)॥

---

(१) दुर्गादासस्तु परस्त्रीशब्दादिनेये कृते सुभगादिपाठसामर्थ्यात् ययोर्लोप इतीकारस्य लोपाभावे सत्यौ तस्यैव वृद्धिरित्याह।

(२) भगान्त, जङ्गलान्त, हृदन्त, सिन्ध्वन्त धेन्वन्त, वलजान्त शब्दा इत्यर्थः।

(३) अङ्गारवेणुरिति पाणिनीये।

(४) इहलोक सर्व्वलोक परलोकश्च इत्यर्थः।

(५) सर्व्वपुरुषः, सर्व्वभूमिः, अन्तरहृत् इत्यर्थः।

(६) अनुशतिक इत्यर्थः।

(७) अस्यहेति, अस्यहत्य इत्यर्थः।

(८) सूत्रनड इत्यर्थः। (९) प्राच्ये देशे वाच्ये नगरान्तशब्दा इत्यर्थः।

नेन्द्रान्तर्घादिवरुणास्तच्चे चेद्देवता अपि ।
अथ प्रवाहण: ण्येये, ण्येयान्तश्च स इत्यपि (१) ॥
अर्द्धादिपरिमाणञ्च भवेदाद्यजनदुयदि ।
अनीश्वरोऽशुचिश्चैवाचेत्रज्ञाकुशलौ मतौ ।
सुभगादिरिति ख्यातोऽसंख्यस्तन्त्रेषु तान्त्रिकैः ॥

भगादीनि पदान्युत्तरपदानि येषां ते। सुभगाया अपत्यं सौभागिनेय:। द्वयोर्द्वयोर्व्रि:। एवं सौभाग्यं दौर्भाग्यम्। महते सौभगाय दीयते, उद्गात्रादिषु छान्दस:। कुरुजङ्गले भव: कौरुजाङ्गल:। केचित् जङ्गलधेनुवलजान्ता: सुभगादौ न पठ्यन्ते, तन्मते कौरुजङ्गल: वैश्वधेनव: सौवर्णवलज इति। सुहृदो भाव: सौहार्दं दौर्हार्दम्, इह मुख्यस्य (२) ग्रहणात्। आदिष्टस्य (३) तु सौहृद्यं सौहृदमिति। सुहृद इदं सौहार्दं। शक्तुप्रधान: सिन्धु:, मध्यपदलोपात् शक्तुसिन्धु:, तत्र भव: शाक्तुसैन्धव:। सिन्धुशब्द: कच्छादिषु पठ्यते, तेन तदन्तविधिरपि ण्ण:। वैश्वधेनवं समूहे, आर्धेनवम्। सौवर्णवालजम्। वध्योगशब्दो विदादिस्तस्यापत्यं ट्ण: वाध्योग:, अनन्तरापत्ये वाध्योगि:। अगारवेणुनामा कश्चित् तस्यापत्यम् आगारवैणव:, एवं शातकौम्भम्। परस्त्रिया अपत्यं पारस्त्रैणेय:, ण्येयस्य इनेय:। इहलोके भव ऐहलौकिक:, लोकोत्तरादिति

(१) ण्येये परे प्रवाहणशब्द:, सुभगादि:, ण्येयान्त: स प्रावाहणेयशब्दोऽपि इति एवं, सुभगादिरित्यर्थ:। प्रावाहणेयशब्दस्य सुभगादिपाठफल परत्र स्फुटीभविष्यति।

(२) अनादिष्टस्य हृच्छब्दस्येत्यर्थ:।

(३) हृदयशब्दस्यासञ्जातस्येत्यर्थ:।

ण्णिकः। सर्व्वलोके विदितः सार्व्वलौकिकः, परलोके भवः पार-लौकिकः। प्रयोगे भवः प्रायौगिकः, अध्यात्मादित्वात् ष्णिकः। असिहत्याया भवः आसिहात्यः। चतस्रो विद्याः चतुर्विद्याः चतुर्विद्या एव चातुर्वैद्यं, चतुर्वर्णादित्वात् ष्णः। परे तु विद्या-स्थाने वेदमाहुः। कुरुपञ्चाले भवः कौरुपाञ्चालः। अधिदेवे अधिभूते भवम् आधिदैविकम् आधिभौतिकम्, अध्यात्मादित्वात् ष्णिकः। राजपुरुषस्य भावः, ब्राह्मणादित्वात् ष्यञः, राजपौरुष्यम्। ष्यञ किं? राजपुरुषस्यापत्यं राजपुरुषायणिः। सर्व्वपुरुषस्येदं सार्व्वपौरुष, सर्व्वभूमेर्निमित्तम् ईश्वरः संयोग उत्पातो विदितो वा सार्व्वभौमः। अन्तरहतोऽपत्यम् आन्तरहातिः। अनुशतिक-स्येदम् आनुशातिकम्। अनुसंवत्सरेण दीयते आनुसांवत्सरिकम्। अस्यहेतिः प्रयोजनमस्य आस्यहैतिकः, गणपाठात् ष्यलुक्। अस्य हत्येऽभियुक्तः आस्यहात्यः ष्णः। अत्र परेकदेशिनः अस्यहेति-अस्यहत्यौ शब्दौ न पठन्ति। अस्यहत्यशब्दोऽध्याये वर्त्तते। कुरुकतस्यापत्यं कौरुकात्यः, गर्गादित्वात् ष्यञः। पुष्कर-सदोऽपत्यं पौष्करसादिः, बाह्वादित्वात् ष्णिः। सूत्रपूर्व्वेति— सूत्रं पूर्व्वं यस्य, स चासौ नड़श्चेति सूत्रनड़ः, तस्यापत्यं सौत्रनाड़िः। अभिगममर्हति आभिगामिको गुणः। अनु-होड़ेन पठति आनुहौडिकः। प्राग्देशेति—नगररूपमन्तदं येषां ते प्राग्देशे वर्त्तमानाश्चेत् सुभगादयः (१)। पुण्ड्रनगरे भवः

(१) येषां शब्दानामन्ते नगरशब्दोऽस्ति तादृशशब्दा यदि प्राचां देशनामानि भवन्ति, तदा ते सुभगादय इत्यर्थः।

पौण्ड्रनागरः सौह्मनागरः। प्राग्देश इति किं ? मद्दनगरे भवः माद्दनगरः। नेन्द्रान्त इति—इन्द्रोऽन्तो यस्य स इन्द्रान्तः, घं आदिर्यस्य स घांदिः, घांदिश्चासौ वरुणश्चेति घांदिवरुणः, इन्द्रान्तश्च घांदिवरुणश्च, तौ न विद्येते यासु ताः, तच्चे इति—तच्छब्देन देवतोच्यते, तासाञ्चः द्वन्द्वः तस्मिन्। तथाच देवताना चे सति उक्तलक्षणदेवतावाचकशब्दाः सुभगादौ पठ्यन्ते। तेन अग्निश्च मरुच्च, तौ देवते अस्य, आग्निमारुतं कर्म्म क्रियते। यो देवताद्वन्द्वः सूक्तसम्बन्धी हविःसम्बन्धी वा तत्रैवायं विधिः। इह तु न भवति—स्कान्दविशाखः, ब्राह्मप्रजापत्यम्। नेन्द्रान्तघांदिवरुणा इति कि ? सौमेन्द्रम्, ऐन्द्रावरुणं (१) हविः। इह तु स्यादेव—ऐन्द्राग्नम् आग्नीवारुणम् (२)। अथ प्रवाहण इति—अथानन्तरं प्रवाहणशब्दोऽत्रादिषु पठ्यते, णेय एव तस्य ग्रहणं, तेन प्रवाहणस्यापत्य प्रावाहणेयः, तस्यापत्यं युवा प्रावाहणेयिः। एतदादिसर्व्वे (३) सुपञ्चालादावपि पठ्यन्ते। तेन पूर्व्वंदस्य त्रि-विकल्पः, प्रवाहणेयः प्रवाहणेयिः। अर्द्धादीति—आदिश्चासौ अच्चेति आद्यच्, न अत् अनत्, आद्यच् अनत् यस्य तत्, परिमाणविशेषणम्। तथाच अकारभिन्नाद्यच् अर्द्धादि परिमाणं सुभगादौ पठ्यते। अर्द्धद्रोणेन क्रीतम् आर्द्धद्रौणिकम्, आर्द्धकौड़विकम्। अनदिति किम् ? अर्द्धप्रस्थेन क्रीतम् आर्द्धप्रस्थिकम्।

---

(१) अत्र अवायुदेवतार्थस्येति इन्द्रशब्दस्य डा, तेनैव दीर्घादित्वम्।

(२) अत्र अग्नेर्डी सोमवरुणयोरिति डी।

(३) प्रवाहणाद्यकुशलान्ताः शब्दाः।

पार्द्धप्रास्थिकम् इति कश्चित्। सुपञ्चालादित्वात् अर्द्धद्रौणिकम्, अर्द्धकौडविकम्। एवम् आनैश्वर्य्यम् अनैश्वर्य्यम्, आशौचम् अशौचम्, आचैतन्यम् अचैतन्यम्, आकौशलम् अकौशलम्, आनैपुणम् अनैपुणम् इत्यादि। असंख्यः सुभगादिः तन्त्रे तान्त्रिकैरुक्तः, तेन उदकशुद्धस्यापत्यम् औदकशौद्धिरित्यादि। प्रसङ्गसङ्गत्या (१) साहित्येन (२) सुपञ्चालादिरिह निरूप्यते।

सुसर्व्वार्द्धाज्जनपदा, अथामद्रा दिशश्च (३) ते।
प्राग्ग्रामनगरा दिग्भागोऽवयवात्ऋतुवाचिनः॥
सवत्सरस्तु संख्यादिः, संख्या संख्यादिरेव च।
अमानपरिमाणञ्च संख्यादि चेदनामनि॥
अभविष्यति संख्यादि वर्षं, प्रोष्ठपदास्तु जे।
अथ प्रवाहणः णेये णेयान्तश्च स इत्यपि॥
अर्द्धादि परिमाणञ्च भवेदाद्यजनद्यदि।
अनीश्वरोऽशुचिश्चैवाचैतन्याऽकुशलौ मतौ॥
अनिपुणश्च, केऽप्यव्रायथातथा-यथापुरौ।
सुपञ्चालादयश्चैते कथ्यन्ते कोविदोत्तमैः॥

सु सर्व्व अर्द्ध इत्येतेभ्यो जनपदाः सुपञ्चालादौ पठिताः, तेन सुपञ्चाले भवः सुपाञ्चालकः, एवं सर्व्वपाञ्चालकः। अथानन्तरं ते जनपदा मद्रभिन्ना दिक्पूर्व्वाश्चेद्भवन्ति तदा सुपञ्चालादौ

(१) सुभगादिगणव्याख्याने सुपञ्चालादिगणोल्लेखेनेत्यर्थः।
(२) इमे सुभग सुपञ्चालाद्योरित्येकत्र पाठेनेत्यर्थः।
(३) दिश इति पञ्चम्यन्त, तेन दिग्वाचकशब्देभ्यः परवर्त्तिन इत्यर्थः।

पद्यन्ते । यथा पूर्व्वपाञ्चालक उत्तरपाञ्चालकः दक्षिणपाञ्चालकः । अमद्रा इति किं ? पौर्व्वमद्रः, आपरमद्रः । दिग्वाचकेभ्यः प्राग्देशवर्त्तिग्रामनगरवाचकाः सुपञ्चालादौ । यथा पूर्व्वा चासौ इषुकामशमी चेति, तत्र भवः पूर्व्वैषुकामशमः पूर्व्वकार्ष्णमृत्तिकः । नगराणां तावत्—पूर्व्वस्मिन् पाटलिपुत्रे भवः पूर्व्वपाटलिपुत्रकः पूर्व्वकान्यकुब्जः । नगराणां ग्रामग्रहणेनैव सिद्धे भेदेन यत् उभयोरुपादानं तत् सम्बन्धभेदप्रतिपत्त्यर्थम् (१) । तथाच दिक्पूर्व्वसमुदायं पूर्व्वैषुकामशम्यादि ग्रामनामधेयम्, इह तु दिग्वाचकं विनैव पाटलिपुत्रादिशब्दो नगरमाह । पूर्व्वत्र ग्रामवाचकसमुदायस्य दिक्पूर्व्वावयवादुत्तरस्य त्रिः । इह तु दिग्वाचकान्नगरस्योत्तरस्य त्रिरिति । अवयवादिति—ऋतुशब्दस्य समभिव्याहारात् ऋत्ववयववाचिनः पूर्व्वदात् ऋतवः सुपञ्चालादौ पद्यन्ते । यथा-पूर्व्वं वर्षाणां (२) पूर्व्ववर्षास्तत्र भवः पूर्व्ववार्षिकः, पूर्व्वहैमन्तः । अवयवादिति किं ? पूर्व्वासु (३) वर्षासु भवः पौर्व्ववार्षिकः । संख्यापूर्व्वसंवत्सरः सुपञ्चालादौ पठ्यते । यथा द्वौ संवत्सरौ व्याप्याधीष्टो भृतो भूतो भावी (४) वा द्विसांवत्सरिकः ।

---

(१) दिक्शब्दैः सह सम्बन्धे यो भेदस्तस्य प्रतिपत्तिनिमित्तमित्यर्थः ।

(२) वर्षाणां पूर्व्वभाग इत्यर्थः ।

(३) अतीतास्वित्यर्थः ।

(४) [illegible] । [illegible] । [illegible] इति [illegible] । [illegible] ५ । १ । ८० । "ननु [illegible] [illegible] कथं [illegible] ? [illegible] । [illegible] इत्युच्यते ।

संख्यापूर्व्वसंख्यापि सुपद्मालादौ, यथा—द्वे षष्टी व्याप्याधीष्टो भृतो भूतो भावी वा द्विषाष्टिकः, द्विसाप्ततिकः । द्विषष्ट्यादिशब्दाः संख्यासु वर्त्तमानाः कालाधिकारीय-त्यमुत्पादयन्ति (१)। संख्यादि मानवर्ज्जितं परिमाणमसंज्ञाया सुपद्मालादौ पठ्यते। यथा—द्वौ कुड़वौ मानमस्य द्विकौड़विकः, द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम् । अनामनि इति किं? पाञ्चलोहितिकः पाञ्चकपालिकः। अमान इति किं? द्वाभ्यां मानाभ्यां क्रीतं द्वैमानम् । अत्र केचित् वा कुलिजस्य ग्रहण, तेन द्विकौलिजिकं द्वैकुलिजिकमित्याहुः । अभविष्यति संख्यादि वर्षं सुपद्मालादौ पठ्यते । द्वे वर्षे व्याप्याधीष्टो भृतो भूतो वा द्विवार्षिकः त्रिवार्षिकः । भविष्यति तु त्रीणि वर्षाणि व्याप्य भावी, त्रैवर्षिकः । तथाच—

> यस्य त्रैवर्षिकं (२) धान्यं निहितं भृत्यवृत्तये ।
> अधिकं वापि विद्येत स सोमं पातुमर्हति ॥ इति महाहृदि:

---

(१) कालाधिकारे य प्रत्ययो विहित एभ्यः स एव स्यात् । अतएव टीकायां "कालेभ्य" इति वक्ष्यमाणवार्त्तिकेन सिद्ध ।

(२) वर्षस्याभविष्यति ७।३।१६। इति पाणिनि । ... वर्षशब्दस्याचामादेरचो वृद्धिर्भवति । द्विवर्षं अधीष्टो भृतो भूतो ... त्रिवार्षिक । अभविष्यतीति किम्? यस्य त्रैवर्षिकं धान्यं ... अधिकं वापि विद्येत स सोमं पातुमर्हति । त्रीणि वर्षाणि ... काशिका ।

जे इति जातार्थो निर्दिश्यते, तत्र यो विहितस्तस्मिन् प्रोष्ठपदाशब्दः सुपद्मालादौ पठ्यते। यथा—प्रोष्ठपदा नाम नक्षत्र, ताभिर्युक्तः काल इत्यर्थे ष्णः, तस्याविशेषे लुप् (१) प्रोष्ठपदा, तत्र जात इत्यर्थे ऋतुनक्षत्रात् ष्णः, प्रोष्ठपादः। ज इति किं? प्रोष्ठपदासु भवः कुशलो वा इत्यर्थे ष्णे प्रौष्ठपदः। प्रोष्ठपदा इति निर्देशात् तत्पर्य्याय-भाद्रपदाशब्दस्यापि ग्रहणं, तेन भाद्रपादः, अजे तु भाद्रपद इति। अथ प्रवाहणः ष्णेय इत्यादिप्रयोगाः प्रदर्शिताः। केऽपीत्यादि आहुरिति शेषः, तेन अयाथातथ्यं अयाथापुर्य्यं, परमते तु आयथातथ्यम् आयथापुर्य्यमित्यपि।

वृद्धिर्भवति अभविष्यदर्थे चेत्तद्धितो विहितः। द्विवार्षिक इति तु पूर्ववत् टिकण्
• * यस्य त्रैवार्षिकं धान्य स सोमं पातुमर्हतीति भाव्यर्थेऽत्र तद्धितः।

मुद्रितस्य कस्यचित् सुपद्मव्याकरणपुस्तकस्य वृद्धिप्रकरणे "दिशः परस्यामद्राणा"मिति १० सूत्रस्य वृत्तौ द्वैवार्षिकं भक्तं, त्रैवार्षिकं धान्यमिति, तथाविधस्य कस्यचित् कलाप-व्याकरण-पुस्तकस्य च चतुष्टयवृत्तौ "वृद्धिरादौ सणे" इति ४२१ सूत्रस्य टीकाया माविन्यर्थे तु द्वे वर्षे भावि द्वैवार्षिकमिति लिपिकरप्रमाद, अन्यथा अभविष्यदर्थे संख्यादिवर्षशब्दस्योत्तरपदवृद्धि नियमस्य भविष्यदर्थक प्रत्युदाहरणे पुनस्तस्यैवोत्तरपदस्य वृद्धे सर्व्वथैवासङ्गतेः, काशिका-सिद्धान्तकौमुदी संक्षिप्तसार-मुग्धबोधटीकाकार-कृष्णनायन्यायपञ्चानन कृतवृहन्मुग्धबोधमतविरुद्धत्वाच्च।

यस्य त्रैवार्षिकं धान्यमिति श्लोकस्तु ब्रह्मवैवर्त्तपुराणे षष्टितमाध्याये श्रीकृष्णजन्मखण्डे नारदं प्रति नारायणवाक्ये यस्य त्रैवार्षिकं धान्यं निहितं भृतिसिद्धये इति कृत्वा पठित, विद्यासागरेण च उत्तरचरितस्य प्रथमाङ्के सोमपीतीत्यस्य व्याख्यायां तथैवोद्धृत. पाठ। एवं मनुसंहिताया एकादशाध्याये ७म श्लोके "यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये" इति पाठो दृश्यते। अतोऽत्र यदुरुष्टव्यं तत् सुधीभिश्चिन्त्यमिति।

(१) दधे कादित्यस्य टीकायां "अविशेषे लुबि"ति वार्त्तिकद्वयं द्रष्टव्यम्।

४२३। क्षुद्रागोधाभ्यो वैरारौ ।

(क्षुद्रा-गोधाभ्यः ५।॥, वा ।१।, एरारौ १॥) ।

नाटेरः नाटेयः, गौधारः गौधेरः गौधेयः ।

गार्ग्यः वात्स्यः जामदग्न्यः पाराशर्य्यः ।

४२३। क्षुद्रा। क्षुद्राश्च गोधाश्च तास्ताभ्यः। स्त्रनिर्द्देशो-गणार्थः। एयस्य एरविधानसामर्थ्यात् वा एयस्य स्थितिः। क्षुद्रादिभ्य एयस्य एरो वा स्यात्। क्षुद्रादयस्त्वङ्गहीनाः शीलहीनाः सह गोधया। गोधादिभ्य एयस्य आरो नित्यं स्यात्, वा शब्दस्य व्यवस्थया।

गोधादयस्तु—गोधा जडो मृगी चैव पण्डः काकी च मूषिका।

नाटेर इति—नट्या अपत्यम् इति वाक्यं, पक्षे नाटेयः। एवं यदा कुलटाशब्दोऽसतीवाचकस्तदा कौलटेरः कौलटेयः, शीलहीनत्वात्। अङ्गहीनायास्तु काणाया अपत्यं काणेरः काणेयः। एवं कौणेरः कौणेय इत्यादि। गौधार इति—गोधाया अपत्यम् इति वाक्यं, क्षुद्रादिपाठात् गौधेरः, अत्रगादौ पृथक् पाठात् गौधेय इति। जडस्यापत्यं जाडारः, मृग्या अपत्यं मार्गारः, पण्डस्यापत्यं पाण्डारः, काक्या अपत्यं काकारः, मूषिकाया अपत्यं मौषिकारः, बाह्वादित्वात् मौषिकिः।

चटकाभ्यामैरो, लुक् तु स्त्रियाम्। चटकाच्च चटकायाश्च परस्य ण्येयस्य ऐरः स्यात्। स्त्र्यपत्ये ऐरस्य लुक्। अतएव

चटकात् णैरः (१) । चटकस्य चटकाया वा अपत्यं चाटकैरः । स्त्रियान्तु चटकस्य चटकाया वा अपत्यं स्त्री चटका ।

गार्ग्य इत्यादि—ननु गर्गादि-नड़ादिभ्यां गोत्र एव ष्य-ष्णायनौ, तत् कथमपत्यसामान्ये विहित (२) इति चेत् सत्य, नामदस्नाः पारागर्य्य इत्युभाभ्याम् अनन्तरे ष्यस्य, द्रौणायन इत्यत्र ष्णायनस्य च दर्शनात् सामान्येनोक्तम्, अन्यत्रान्तर एवेति भावः (३) । गर्गस्य गोत्रापत्यं गार्ग्यः, अनन्तरे तु अतः ष्णिः गार्गिरित्यादि ।

गर्गादिर्यथा—

गर्गो वत्साहृती (४) रेभो व्याघ्रपादवटः (५) शठः ।
अजो विदभृत्यग्निवेशौ (६) जरमाणो धनञ्जयः ॥
वृको विश्वावसुः शङ्खो वभ्रु-धूम्र-पुलस्तयः (७) ।
संस्कृतिर्वेटभृद्दीनयोगोवाजस्तमे (८) मधुः ॥
विप्रेऽथ लोहितो मण्डुर्जिगीषुर्गुहलुर्लतुः ।
कपि-बोध-वतण्डास्त्वाङ्गिरसेऽप्यथ कौशिके ॥

---

(१) स्त्रीत्वे चटका च चटकश्च ताभ्यामित्येकशेषः । कल्याण्यादिगणे चटकाच्छब्दा-नुक्तेऽपि इह ग्रहणादिह तस्मात् णैर इत्यर्थः ।

(२) ष्य इति शेषः ।

(३) अनन्तरे अव्यवहिते पौत्रादौ गोत्रे वाच्ये इत्यर्थः ।

(४) वत्स, आहृति ।

(५) व्याघ्रपाद्, अवट ।

(६) विदभृत्, अग्निवेश ।

(७) वभ्रु, पुलस्ति ।

(८) संस्कृति, वेटभृत्, दीनयोग, वाजस्तम ।

वभ्रु-शंसित-सूक्तिन्द्र(१)-मनायी-मनु-कच्छपाः।
मन्तुः मङ्कुः कतस्तण्डस्तरुचो (२) रुच-मङ्कु च।
तनुः कुरुकतश्चैव तलुच-शकलेन्द्रङ्कः (३)॥
कण्वोऽगस्ति-विरोहितौ वृषरङ्गपूर्वौ गणः (४) पिप्पलूः
कृष्णो भण्डिल-शण्डिलौ च चिकितो दल्भस्तितिक्षो(५) भिषक्।
गोकक्षाररकावुलूक-सुपलौ स्यूरा सुलाभ्येकलू (६)
जीतो मन्वित भिक्षुजाऽश्मरथ गोलुन्द तथा कुण्डिनौ॥
अनडुद्यज्ञवल्कौ च पर्णवल्कः पराशरः।
जतूकर्णः शर्कराक्षः पूतिमाषश्च पिङ्गलः।
मुद्गलो बृहदग्निश्च कुटीभल्लमदग्नि च।
लोहितादिश्च कण्वादिर्गर्गादौ परिकीर्त्तितः॥

गर्गस्याऽन्तरापत्यमिति वाक्यं, ण्येर यशोर्लोप इति अकारलोपे ञिः। स्त्रिया षित्त्वादीपि गार्गी, ष्णायनपक्षे गार्ग्यायणी। एवं सर्व्वत्रोहनीयम्। इह पुलस्तिशब्दपाठात् ञ्वे पुलस्तयः। पुलस्त्य-शब्दस्य तु ञ्वे पौलस्त्या इति। यद्यपि वेदभृच्छब्दात्टपिण्ये कृते पश्चात् स्वार्थे ण्येर वैदभृत्य इति सिध्यति, तथापि ञ्वे लुकि वैदभृत इति सिद्ध्यर्थः पाठः, तत्र तु वैदभृत्या इति। वाजशब्दोऽसे गर्गादिः, तेन वाजस्यापत्यं वाज्यः; से तु

(१) सूक्त, इन्द्र।
(२) कत, तण्ड, तरुच।
(३) शकल, इन्द्रङ्क।
(४) वृषगण, रङ्गगण।
(५) दल्भ, तितिक्ष।
(६) गोकक्ष, अररक, उलूक, सुपल, स्यूरा, सुलाभिन्, एकलू।

४२४ । ओदौतोऽञ्वत् तहृद्य-क्यङ्याः ।

(ओत्-औतः ५।, अञ्वत् ।१।, तहृद्य-क्य-ङ्याः-१।।।) ।

ओदौद्भ्यां परस्तहृत्संज्ञकश्च यः क्यङ्यौ च अञ्वत् स्यात् ।

बाभ्रव्यः । नाड्वायनः गार्ग्यायणः दाक्षायणी । पैतृष्वस्रीयः मातृष्वस्रीयः । रैवतिकः आश्वपालिकः । यादवः आङ्गिरसः ।

गौवाजिः । एतेनान्येषां वेऽपि गौगार्ग्य इत्यादि । मावव्यो विप्रः, अन्यत्र माववः ।

यकारान्ताल्लोहितादेः (१) ष्फस्य स्त्रियां स्यादित्यर्थः । तेन लौहित्यायनीत्यादि । कपिस्त्वपत्यं काप्यः, स्त्रियां काप्यायनी । एवं बौध्यः बौध्यायनी, वातण्ड्यः वातण्ड्यायनी । अनाङ्गिरसे तु कापेयः बौधिः, वातण्डः शिवादित्वात् ष्णः । अनाङ्गिरसेऽपि गर्गादित्वात् ष्यः, वातण्ड्यः, स्त्रियां वातण्ड्यायनी वातण्डीति कश्चित् ।

४२४ । ओदौ । ओच्च औच्च तत्तस्मात्, अञिव अञ्वत्, तश्च हृच्च तौ तहृतौ, त-हृतोर्ये तहृद्यः, तहृद्यश्च क्यश्च ङ्यश्च ते । बाभ्रव्य इति—बभ्रोरपत्यं ष्यः, ष्णोर्द्वौपोनाविति इवर्णस्यौकारः, यस्याञ्वद्भावात् अन्तायवायाव इत्यवादेशः । कौशिक एवाभिधानम्, अन्यत्र बाभ्रवः । ननुस्थाने नन्वोगिति पठन्त्यपरे । कतो मुनिविशेषः, तस्यापत्यं कात्यः, स्त्रियां कात्यायनी ।

---

(१) गर्गादौ लोहितादिकतपर्यन्तस्य ... इहेष्ट इत्यर्थः ।

कण्वादेः प्रयोजनमग्रे वक्ष्यते। गर्गादेराकृतिगणत्वात् वामरथ-शब्दः कण्वादौ ज्ञातव्यः। वामरथस्यापत्यं वामरथ्यः, द्वे तु वाम-रथ्याः, स्त्रियां वामरथ्यायनी वामरथ्यौ, वामरथ्यस्यापत्यं युवा वाम-रथ्यायनः, वामरथ्यस्य छात्रा वामरथाः। सङ्घाङ्कघोषलक्षणानि वामरथानि, (१) वामरथशब्दादगोत्रेऽप्युपचारात् (२)।

कुर्व्वादेरपिद्गोराजश्वशुरात्त्वनिन्मनोस्तु संश। कुर्व्वादेर्गोत्रेऽगोत्रे च ण्योऽपित् स्यात्, ण्य इत्यर्थः, गोराजश्वशुरेभ्यस्तु अनित् इत्युभयो, य इत्यर्थः, मनोस्तु ययोगे सश, न इत्। कुरोरपत्यं कौरव्यः कौरव्यौ कौरव्या इत्यादि, स्त्रियां कौरव्यायणी कौरव्या। केचित् कौरव्यायणीति नित्यमाहुः। एवं लाचण्यः लाचण्यौ लाचण्याः। स्त्रियां लाचण्या इत्यादि।

कुर्व्वादिर्यथा—

कुरु कवि गर्गर-गणिका-कूटं, शकल शलाका सत्यंकारम्।
शाकः शम्भो मति-मञ्जूषं, तथा लक्षण-वडभीकारम्।
एरका-सुर-केशोरि रथकारश्च पट्टिका।
पिण्डीमूलेन्द्रजाली वाक् शकन्धूरविमारकः (३)।

---

(१) वामरथस्यापत्यं वामरथ्यस्तस्येमानि (सङ्घाङ्कघोषलक्षणानि) इति वाम-रथानि। अत्र वामरथ्यशब्दात् सङ्घादिषु वाच्येषु "ञ्यण्यञ्-इञाम् सङ्घाङ्कघोष-लक्षणे" इति वक्ष्यमाणवार्त्तिकेन इदमर्थे ष्ण, तस्मिन् अपत्यण्यस्य लोपे वाम रथानीति। वार्त्तिकन्तु विकारसङ्घेति सूत्रस्य टीकायेव द्रष्टव्यम्।

(२) ननु वामरथशब्दस्य गर्गादित्वात् कथमपत्यसामान्ये ष्णप्रत्ययः अत आह वामरथशब्दादिति। उपचारात्—गोत्रत्वारोपादित्यर्थः।

(३) पिण्डीमूल, इन्द्रजालि, वाच्, शकन्धु अविमारक।

एकजित् श्यावनायश्च पितृमत्-पथिकारिणौ।
हन्ता भर्त्ता शूर्पणायो दामोष्णीषिरिनस्तथा (१)।
भर्वः श्यावरथः श्यावपुत्रः सेनान्तका मताः।
कारवः, क्षत्रिये सम्राट्, केशिन्याः केशिनो भवेत्।
ण्ये भ्रातुर्वम् च तस्यैव (२) वेणः केनचिदीरितः।
यमादित्यादितिस्यैवाऽपश्वाद्यादिपतिर्दितिः (३)।

पश्वादिर्यथा—

पश्वश्व-कुल-राष्ट्रार्थ-गण-वास्तु-धनं वसु।
विद्या-शत-नर-चेतं प्राण-धान्य-सभा-जगत्॥

रथकारशब्दोऽत्र जातिवचनः, शिल्पिवचनस्तु कारुत्वेनैव प्राप्तः। शके भवतीति शकम्भूरिह पाठबलान्मकारागमः। हारिषेण्यः वैष्वक्सेन्यः, बाह्वादित्वात् हारिषेणिः वैष्वक्सेनिः। एव तान्तवाय्यः तान्तवायिरित्यादि। सम्राजोऽपत्यं साम्राज्यः, क्षत्रियः। अन्यत्र बाह्वादेराकृतिगणत्वात् साम्राजिः। केशिन्या अपत्य कैशिन्यः, ण्ये केशिनादेशः, अन्यथा पुंवद्भावे (४) कैश्यः स्यात्। भ्रातुरपत्यं भ्रातृव्यः (५) ण्यस्य वम्, पितृष्वस्रादित्वात् भ्रात्रीयः। कस्य-

(१) दामोष्णीषि, इन।

(२) भ्रातृशब्दात् ण्ये सति तस्य शब्दस्यैव वम् भवति, न तु।

(३) यम, आदित्य, अदिति, पश्वादिगण भिन्नशब्दपूर्ब्बक-पतिशब्द, दिति।

(४) पुंवद्भाववार्त्तिकसूत्रं २२८ सूत्रस्य टीकाया द्रष्टव्यम्।

(५) भ्रातृव्यौ भ्रातृजद्विषौ इत्यमरः। भ्रातुः शत्रुरपत्यञ्च भ्रातृव्यौ। अत्र द्विट्पक्षे रूढिकल्पनं, तेन सामान्यद्विड्वेव न तु भ्रातृद्विट्। भ्रातृपुत्रः शत्रुश्च भ्रातृव्याविति महेश्वरः। तन्मते भ्रातृशब्देन भ्राता शत्रुश्चेति मन्तव्यम्—इति प्रयोगरत्नमालाटीका।

चिन्मते वेणशब्दस्य कुर्व्वादित्वात् वैण्यः, तथा च—वैण्यं पृथुं हैहय-मर्ज्जुनञ्च इति। वेणाच्छन्दसीति पाणिनिसूत्राच्छान्दसमिदम्। यमस्यापत्यं याम्यः। आदित्यस्यापत्यम् आदित्यः, ण्ये ण्यलोपः(१) अदितेरपत्यम् आदित्यः। प्रजापतेरपत्यं प्राजापत्यः, एवं वैश्वपत्यः। दितेरपत्यं दैत्यः। पश्वाद्यादिपतेस्तु—पाशुपतः जागत्पत इति कुर्व्वादि। गोरपत्यं गव्यः। राज्ञोऽपत्यं राजन्यः, क्षत्रियेऽभिधानम्, अन्यत्र राजनः.मन्वर्ज्जेत्यादिना नियमेन न नलोपः, इनपन् इति नियमान्न उङ्लोपः। श्वशुरस्यापत्यं श्वशुर्य्यः, संज्ञायां वाह्वादित्वात् श्वाशुरिः। मनोरपत्यं मनुष्यः, ये सन्, न इत्। नाड़ायन इति—नडस्यान्तरापत्यम् इति वाक्यम्।

नडादिर्यथा—

नड भण्डित रोहिण शङ्ख पुटं
पद (२) काण चर गिरि चक्र कुटम्।
विद काश वनं कुल धूम नलं
किर चित्र सुरं खड लोह नरम्॥
भड्लि भड़लो भडितः प्रकृति-(३)
स्रपलो नमकः खदिरो मिमतः।
चरकः शकटः शलभी वदरः
स्थिरकः खरपः सुमनोऽज-जनाः॥

(१) अदितिशब्दस्य कुर्व्वादौ पाठात् ण्ये च्यादित्य, आदित्यशब्दस्यापि तत्र पाठात् पुनर्ण्ये यथोर्लोप इत्यकारयकारयोर्लोपः।

(२) पाद इति पाणिनीये।

(३) प्रकृतिरित्यत्र प्रकृत इति सक्षिप्तसारे, प्रकृत इति पाणिनीये।

सायक दासक किङ्कर दुर्गं
कातर काखल (१) पिङ्गल धूम्रम्।
भण्डिल कोशल सुपक विशालम्
आतप चूप(२)मख विशम्पम्॥
ओजः खरप पञ्चाल वामोदश्च धरित्रिणः।
अश्मा गोमी च गोलाश्च (३) जलन्धर युगन्धराः॥
कुमारः शिंशपा काव्यो वीचार्हावितिशेतिकौ (४)।
आनडुह्यार्ज्जुनौ दण्डी श्यामो वाग्मी च सप्त च॥
इन्द्रामुष्यौ निगुः (५) काश्यो राजन्य तिक पिञ्जराः।
द्वीपः प्राणो दास मित्र मुञ्जार्क तृण शूद्रकाः॥
अनुग्रीवः श्रविष्ठा च विश्वानरश्च हंसकः।
मण्डपाकश्मल(६)स्तम्भ-खर्ज्जूर-चमसश्च त्रटक्।
ग्रीष्मो हस्ती वैश्य(७)वाप्यौ सुक्रत्यः शोण-कामुकौ।
ब्राह्मणोडुम्बरालोह द्रोण जीवन्त पर्व्वताः॥
खनाऽश्मलाग्रदण्डं (८) स्यात् शलङ्कुस्तु ह्यकौशिके।
वाशिष्ठे तु वणो विप्रे कृष्णो जातस्तु पूरुषे॥

(१) कातल इति पाणिनीये।
(२) पाणिनीये संक्षिप्तसारे च चूप इत्यत्र ह्रस्वउकारो दृश्यते।
(३) गोलाद्ध इति पाणिनीये।
(४) वीच, चर्ह, इतिश, इतिक।
(५) निगु इति पाणिनीये।
(६) अकश्मलशब्दः पाणिनीये संक्षिप्तसारे च न दृश्यते।
(७) वैल्य इति पाणिनीये संक्षिप्तसारे च।
(८) खन, अश्मन, अग्र, दण्ड।

दर्भे आग्रायणे भर्गस्त्रैगर्त्ते शुनकस्तथा।
वात्स्ये ऋषावग्निशर्म्मा स्याच्छरद्वांस्तु भार्गवे॥
भारद्वाजे तु आत्रेयो भरद्वाजः शपस्तथा।
आत्रेयेऽथ ष्णायने च क्रोष्टोरुलुक् सदा मतः।
ष्णान्ता ष्यन्ताश्च गोत्रार्था ट्वान्ताश्च हरितादयः॥

शिंशपाया अपत्यमित्यर्थे—आदाय्चो णित्ते शिंशपा दित्य-वाट्-श्रेयो-दीर्घसत्र-देविकानाम्। शिंशपादीनां णित्ते परे आद्यचः स्थाने त्रि-प्रसङ्गे आत् स्यात्। शांशपायनः (१)। आनडुह्य इति—गर्गादिष्णान्तः। अर्ज्जुनस्यान्तरापत्यम् आर्ज्जुनायनः। बाह्वादित्वादार्ज्जुनिः। एवं सासायनः सासिः, पद्मानामपत्यं पाद्मायनः, बाह्वादित्वात् पाद्मिः। वैण्य इति—वेणो नाम राजर्षिस्तस्यापत्यं ह्रस्वेकोशलाजादेरिति (२) ष्यङ्, वैण्यस्तस्यापत्यं युवा वैण्यायनः। अतएव ष्ण-ट्व-क्षत्रियार्षेभ्य इति न लुक्। द्रौणायणोऽश्वत्थामा इति तु पुत्रे पौत्रत्वोपचारात्। शलङ्कोरन्तरापत्यं शालङ्कायनः ष्णायने उतो लोपः। इदमकौशिके, कौशिके तु बाह्वादिः। वाणायनो वाशिष्ठः, अन्यत्र वाणिः। कार्ष्णायनो विप्रः, अन्यत्र कार्ष्णिः। जातस्यान्तरापत्यं जातायनः पुमान्। पुरुष इति

---

(१) शिंशपाया विकारः शांशपो दण्ड इत्यपि। दित्यो लाङ्गलं, तं वहतीति दित्यवाट् वृषभः तस्यायं दात्यौहः। दात्यूह इति कात्यायनः। दितिं वहतीति दितिवाट् कश्यपस्तस्मात् जात इत्यर्थे दात्यूह इति कश्चित्। डाउक् इति ख्यातो जलचरपक्षिविशेषः। श्रेयसि भवं श्रायसम्। दीर्घसत्त्रे भवं दार्घसत्त्रम्। देविका नदी, तत्र भवं दाविकमुदकं (प्रयोगरत्नमाला १५६६ सू)।

(२) कुञ्जादेरिति ४२८ सूत्रस्य टीका द्रष्टव्या।

किं ? भ्रातृव्य अपत्यार्थं नास्ति । यानि पितृकुलादीनि निर्दिष्टानि-
स्यादि एकं पितृव्य व्याकरणेऽपि । मातामहः पितामहः १
एतस्य भ्राता । मातुर्भ्राता मातुलः २, एतस्य मातुः । पितुर्मा-
ता पितामही, एतस्य पितामहः, स्त्रियाम् ङीः । पितुर्मातामहा-
मही, एतस्य मातामहादीनाम् आर्षप्रयोगः । मातुर्माता मातामही,
एतस्य मातामहः, स्त्रियाम् ङीः । अविद्यते मातुः मातृष्वसृ,
अपत्यादिभिः । मातृष्वसुः पितृष्वसुः, एतस्य मातृष्वसा—
स्त्रियाम्, स्त्रियः—इत्यादि । पितृष्वसा पितृष्वसुः, एतौ तत्र,
मातृषु । इत्यर्थेऽपि इति कश्चित् । गोत्रादिभिः प्रयोगात्
पौत्रादिभिः प्रत्यय तद्धितौ भवन्ति, तत्रादेव नियमात् वृद्धि
प्रत्ययः । सूत्रे गर्भार्थं इति गर्भपरिग्रहणार्थं पठितं, तथा-
पत्यं पुत्रा इत्यर्थे प्रत्ययः, अपि तु प्रत्यय नेयः ३ । एवं पाण्डव
इत्यादि । सूत्रे शाकायन इति प्रत्ययात्प्रत्यय इति शाकि-
प्रत्ययान्तं पुत्रा शाकायनः, एवं आश्वायन इत्यादि । किं
गर्भपरिग्रहं सूत्रे गर्भार्थौ वर्तेते किन्तु पुत्रार्थिकायां
शाकायनी तु तत्प्रत्ययान्तं शाकायनः, स्त्रियां पितृत्वादि ।
गोत्रार्थं इति किं ? गौरी देवता अस्य गौरप्रत्ययान्तं गौरिः ।
पुत्रादस्य निवासः गौतमीप्रत्ययार्थं गौतमः, इत्यन्तः । एवं
द्वाभ्यां इतिनादयः । इतिप्रत्ययान्तं दाक्षिः, विदादिभ्यः-

146295

१ शाकायनो गर्भार्थः ।
(२) पितृत्वादि सूत्रे: प्रत्ययान्तं बोधकः
३ कालाद्दुक्तिकृतं च द्वन्द्वोऽपि ।

त्वात् वृद्धः, तस्यापत्यं युवा ह्वारितायनः। परस्त्रिया अपत्यं(१) पारशवस्तस्यापत्यं युवा पारशवायन इत्यादि।

पैलादेः (२) ष्णायनस्य लुक्। पैलादेः परस्य ष्णायनस्य यूनि विहितस्य लुक् स्यात्। पीलाया अपत्यं पैलस्तस्यापत्यं युवा पैलः। एवमुदीचोऽपत्यम् औदञ्चिस्तस्यापत्यं युवा औदञ्चिरित्यादि। पैलादिर्यथा—

पैल औदञ्चि-औलिङ्गि सात्यकामिश्च सात्यकिः।
औदव्रज्यौदमज्ज्यौदशुद्धि(३)शालङ्कयस्तथा।
गोपाक्ष्यौदमेघौ च देवस्थान्यौदगायनी।
श्वाफल्क्यौदन्विती राहक्षतिश्चैवौज्जिहायनिः।

पैङ्गलायनि वात्स्यायनि पैङ्गायनि वारुणि। ण्यन्तानामेषां "प्राचां ष्णोश्चावैद्धादे"रित्यनेन लुकि सिद्धे अप्राच्यार्थं पृथगुपादानम्।

प्राचां ष्णोश्चावैद्धादेः। प्राचां गोत्रे यः ष्णिस्तदन्तात् यूनि विहितस्य ष्णायनस्य लुक् स्यात्, न तु वैद्धादेः। पन्नागारस्यान्तरापत्यं पान्नागारिस्तस्यापत्यं युवा पान्नागारिः। वैद्धादेस्तु

---

(१) परस्त्रीशब्दस्य परशादेशः। अत्र गोयीचन्द्रः—अत्र परस्त्रीशब्देन भिन्नजातीया स्त्री वाच्या, रूढश्चायं शब्दः। ब्राह्मणेनोढाया शूद्राया अपत्यं पारशवः, अन्यत्र तु पारस्त्रैणेय।

(२) अत्र शाल्यादेरित्यपि पाठः। शालस्यान्तरापत्यं शालिः तस्यापत्यं युवा शालिरित्युदाहरणञ्च।

(३) कारिकायां बृहन्मुग्धबोधे च उदन्नुद्धिरिति पाठो दृश्यते सिद्धान्तकौमुद्यान्तु उदशुद्धिरिति।

विद्धस्यान्तरापत्यं वैद्धिः तस्यापत्यं युवा वैद्धायनः। धारणस्यान्तरापत्यं धारणिः तस्यापत्यं युवा धारणायन इत्यादि।

वैद्ध्यादिर्यथा—

वैद्धि धारणि वाल्मीकि प्राणाहतिश्च दैवतिः।
तौल्वल्यासुरि-दैवोद्दि पौष्पि-वैल्वकि-वैरकि॥
कारेणुपालि-वैकर्णी कालिङ्ग्याहिसकी तथा।
चापेटक्यासिबन्धी पौष्करसादिश्च नैयमिः।
दैवमत्यान्तरहती तथा दैवयजिर्मतः॥

न भरत गोत्राच्च। प्राच्यात् भरतगोत्राच्च यूनि विहितस्य लुक् स्यात्। अर्ज्जुनस्यान्तरापत्यम् आर्ज्जुनिस्तस्यापत्य युवा आर्ज्जुनायनः। पूर्ब्बस्य बाधकोऽयम्।

पैतृष्वस्रीय इत्यादि। पितृष्वसुरपत्यमिति वाक्ये णीयः, णित्त्वाद्वृिः, स्त्रियां पैतृष्वस्रीया, पैतृस्वस्रीयाभार्य्य (१) इत्यादि। पितृष्वस्रादिर्यथा—

पितुःस्वसा तथा मातुः, स्वसा, भ्रातुरणिद्द भवेत्।
कुत्सायां णायनिश्चैव सौवीरगोत्रसम्भवः॥

भ्रातृशब्दात् णीयोऽणित्, तेन भ्रात्रीयभार्य्य इति (२)॥

सौवीरगोत्रसम्भवो णायनिः (३) कुत्साया पितृष्वस्रादौ पठ्यते, तस्मादपि अणिणीयः। यमुन्दस्यापत्य यामुन्दायनिः तस्यापत्यं

(१) अत्र युष्मत्कविकारार्थवर्ज्जणित्तान्तत्वान्न पुंवद्भाव।
(२) अत्र णित्तान्तस्याभावात् पुंवद्भावः।
(३) सौवीरगोत्रापत्येऽर्थे सम्भूतो यो णायनिप्रत्ययस्तदन्ताः शब्दा इत्यर्थः।

युवाऽणित्य्यः, यामुन्दायनीयो जाल्मः, रेवत्यादित्वात् यामुन्दायनिकः। एवं सौयामायनीयः सौयामायनिकः, वार्ष्णायणीयः वार्ष्णायनिकः। तथाच—

यमुन्दश्च सुयामा च वार्ष्णस्तेभ्यः फिञ (१) स्मृताः।
सौवीरेषु च कुत्सायां द्वौ योगौ शब्दवित् स्मरेत् ॥

इति महावृत्तिः।

द्वौ णीयण्णिकौ। णित्त्वाभावे पूर्ववत् प्रयोजनम् (२)।

रैवतिक इति—रेवत्या अपत्यम् इति वाक्यं, यस्येत्यादिना ईकारलोपः मित्र, स्त्रिया रैवतिकी। आश्वपालिक इति अश्व पालयतीति अश्वपालः अण्, तस्यापत्यमिति वाक्यम्।

रेवत्यादिर्यथा—

रेवत्यश्व-मणि-द्वारपूर्व्वपालोऽथ कुत्सने (३)।
गोत्रस्त्रियश्च (४) वाहुल्याद्वृद्धाः सौवीरगोत्रजाः ॥
कर्णग्राह-वृकग्राहौ कुक्कुटाक्षस्तथैव च।
वृकवञ्चौ सवर्णा च परे शिष्टप्रयोगतः ॥

अश्व-मणि-द्वारेभ्यः पालो रेवत्यादौ पठ्यते। जयादित्यस्तु अश्वपाली मणिपाली द्वारपालीति स्त्रीलिङ्गमङ्गीकरोति। न्यासे तु द्वारपालादीनामदन्तनिर्देशः। अथानन्तर गोत्रविहितत्वात्ताः

(१) पाणिनीये फिञ्प्रत्यय, तर्कवागीशमते णायनि.।
(२) पुंवद्भावसिद्धिरित्यर्थ ।
(३) पितरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सेति काशिका।
(४) पौत्रप्रभृत्यपत्यं गोत्रं,-तथाभूता या स्त्रिय. गोत्रस्त्रिय ।

स्त्रीलिङ्गाः कुत्सायां रेवत्यादौ पठ्यन्ते। यथा—गार्ग्या अपत्यं युवा गार्गिको जाल्मः, ग्लुचुकायन्या अपत्यं युवा ग्लौचुकायनिको जाल्मः, भिन्नतादित्वात् गार्गः ग्लौचुकायनश्च जाल्मः। गोत्रेति किम्? कारिकेयो जाल्मः। स्त्रियः इति किम्? औपगविः। कुत्सायामिति किम्? गार्गेयो माणवकः (१)। कुत्सन इत्येव, तेन सौवीरगोत्रे ये वृद्धास्तेऽपि कुत्सायां बाहुल्याद्रेवत्यादौ पठ्यन्ते। भगवित्तस्यापत्यं भागवित्तिस्तस्यापत्य युवा भागवित्तिको जाल्मः, बाहुल्यात् पक्षे यथाप्राप्तं भागवित्तायनो (२) जाल्मः। तृणविन्दोरन्तरापत्यं तार्णविन्दवः तस्यापत्य युवा तार्णविन्दविकः। आकशापस्यान्तरापत्यम् अत्र्यादेराकृतिगणत्वात् आकशापेयः, तस्यापत्यं युवा आकशापेयिकः। अन्ये तु अत्र्यादिपठितत्वात् आकशायनशब्दस्यैव आकशायनेयिको जाल्मः इति वदन्ति, तन्न।

तथाचाहुः—

भागपूर्व्वपदो वित्तिर्द्वितीयस्तार्णविन्दवः।
तृतीयस्त्वाकशापेयो गोत्रात् (३) ठग्बहुलं ततः (४)॥

इति परे।

---

(१) अत्रापि गार्ग्या अपत्यं युवेति वाक्यम्। "मातामह्यादेरुपलक्षणार्थोऽयं प्रयोग इति नास्ति कुत्सा" इति काशिका।

(२) गोत्रप्रत्ययान्ताना नडादौ पाठादत्र फायन।

(३) गोत्रात् गोत्रविहितप्रत्ययान्तात्।

(४) ततस्तस्मात् भागवित्त्यादिशब्दत्रयात्।

४२५ । मन्वर्ज्जान्वर्म्मोक्षस्येनोऽनोऽध्वात्मनो-पत्यणोऽविकारणाभावकर्म्मीय ईने न न लोपः ।

(मन्वर्ज्जान्वर्म्मोक्षस्येनः ६।, अनः ६।, अध्वात्मनः ६।, अपत्यणे ७।, अविकारणाभावकर्मीये ७।, ईने ७।, न ।१।, न-लोप १।) ।

ठक् णिकः । वृद्धग्रहणमिह स्त्रीनिवृत्त्यर्थम् (१) । सौवीर-गोत्रजा इति किम् ? औपगविर्जाल्मः । कुत्सायामिति किम् ? भागवित्तायनो माणवकः ।

शेषानुदाहरति यादव इति—यदुर्नाम कश्चित्, तस्यान्तरा-पत्यार्थे णः । आङ्गिरस इति—अङ्गिरसोऽपत्यम् इति वाक्यम् (२) । मुनौ तु शिवादित्वात् (३) । एवम् औपगवः माधवः मारीच इत्यादि ।

४२५ । मन् । मनं वर्ज्जयतीति मन्वर्ज्जः, स चासौ अन् चेति मन्वर्ज्जान्, स्यादिन् स्येन्, मन्वर्ज्जान् च वर्म्मा च उक्षा च स्येन् च तत्, मन्वर्ज्जान्वर्म्मोक्षस्येन् तस्य । अध्वा च आत्मा च तत्तस्य । न विकारोऽविकारस्तस्मिन् णः अविकारण, भावश्च कर्म्म च ते भावकर्म्मणी, न भावकर्म्मणी अभावकर्म्मणी,

---

(१) सौवीरगोत्रजा इत्युक्तेरपत्यप्रत्ययान्ता सौवीरगोत्रोत्पन्नवाचका शब्दा गृह्यन्ते । ते चापत्यप्रत्ययान्तत्वादादिस्वरवृद्धौ वृद्धसंज्ञका भवन्ति, तथापि वृद्ध-ग्रहणं, तथाविध-स्त्रीलिङ्ग शब्द-निवृत्त्यर्थमिति भावः ।

(२) अत्र अङ्गिरा नाम कश्चित् ।

(३) शिवादौ कुर्व्वन्त्यकप्रणाय इत्युक्ते ।

मन्वर्ज्जस्थानो वर्म्मणः उच्णः स्यात् परस्येनश्च अपत्यार्थ-ष्णे, अनो विकारार्थवर्जे ष्णे भावकर्म्मार्थवर्जे ये च, अध्यात्मनो-रीने, न-लोपो न स्यात् । याज्वनः भाद्रवर्म्मणः औच्णः चाक्रिणः[1] ।

शैवः वाशिष्ठः ।

तयोर्यः अभावकर्म्मयः, पश्चात् अविकारष्णश्च अभावकर्म्मयश्च तत्तस्मिन् । याज्वनः इति—यज्वनोऽपत्यम् इत्यर्थे ष्णः न्वोर्लोपीती तेऽच्ये इति प्राप्तनलोपोऽनेन निषिध्यते । मन्वर्ज्ज इति किं? भाद्रसामः सौसामः । अपत्यष्ण इति किं? चर्म्मणा परिवृतो रथः चार्म्मणो रथः (१) । मन्वर्ज्जानित्युक्तेः वर्म्मणो वर्ज्जने प्राप्ते वर्म्मग्रहणादाह भाद्रवर्म्मणः इति—भद्रवर्म्मणोऽपत्यम् इति वाक्यम् । एवं शार्व्ववर्म्मण इत्यादि । औच्ण इत्यादि—यद्यपि मन्वर्ज्जेत्यनेन नलोपप्रतिषेधादुच्णोऽपि प्रतिषेधः सिध्यति, तथाप्युच्णः पृथग्ग्रहणमेवं ज्ञापयति, अपत्यष्णातिरिक्ते ष्णे नलोप-निषेधो न भवति, तेन औचं पदमित्यत्रानोऽविकारष्णे (२) निषेधो न स्यात् । चाक्रिण इति—चक्रिणोऽपत्यम् इति वाक्यं, स्येनो न नलोपः । अस्य सूत्रस्य योगविभागः कर्त्तव्यः, तेन क्वचिद-न्यत्रापि (३) । तथाहि—

---

(१) अत्र मनन्तत्वान्नलोपे प्राप्ते अपत्यार्थष्णाभावान्न नलोपः ।

(२) औचमित्यत्र इदमर्थविहितष्णे इत्यर्थः ।

(३) अप्रतिषिद्ध-नलोपोऽपि न स्यादिति शेषः ।

ब्रह्मणो जातावपत्यण्णे। ब्रह्मणोऽपत्यण्णे नलोपो न स्यात् जातौ। ब्रह्मणोऽपत्यं ब्राह्मणो जातिः (१)। अपत्यण्ण इति किं ? ब्राह्मी नामौषधिजातिः। जातौ किं ? ब्रह्मणोऽपत्यं ब्राह्म इति।

पणि गणि गाथि केशि विदथिनो वा तु हितनाम्नः। एषामपत्यण्णे नलोपो न स्यात् हितनाम्नस्तु वा। पणिनोऽपत्यं पाणिनः, एवं गाणिनः गाथिनः कैशिनः वैदथिनः। हितनाम्नोऽपत्यं हैतनाम्नः हैतनामः।

इनोऽकलाप्यादेरनपत्ये। इनो नस्य लोपो न स्यात्, न तु कलाप्यादेः अनपत्यण्णे परे। स्राग्विणः मैधाविनः। अपत्ये तु मैधाव इत्यादि। कलाप्यादेस्तु कलापिन इद कालापम्। कलाप्यादिर्यथा—

कलापी पीठसर्पी च कुथुमी तैतिली तथा।
जाजली लाङ्गली स्यात् सब्रह्मचारिशिखण्डिनौ।
कलाप्यादौ शिलाली च नव शब्दाः प्रकीर्त्तिताः॥

कर्म्मचर्म्मणोरताच्छील्यकोषयोः। ताच्छील्यभिन्ने कर्म्मणः कोषभिन्ने चर्म्मणो नलोपो न स्यादनपत्यण्णे। कार्म्मणं चार्म्मणम्। अताच्छील्यकोषयोरिति किम् ? कार्म्मः कर्म्मशीलः, चार्म्मः कोषः।

दण्डिहस्तिनः ण्णायने, जिह्माशि वासिनोस्तु ण्णेयणायन्योः। नलोपो न स्यात्। दण्डिनोऽपत्यं दाण्डिनायनः, एवं हास्तिनायनः। जैह्माशिनेयः वासिनायनिः।

---

(१) अत अनन्तस्यापि ह्यपत्यण्णे न नलोप ।

अयस्कान्तः शिले। अयस्कान्त इतो यत्नः अयस्कान्ता, तनशीति वेत्ति वा आयर्वेदिकः।

गौर इत्यादि। गौरादिपठितमिति वाक्यम्।

गौरादिर्यथा—गौर नट गडा कद्रुर्मा मयूरी

वराङ्ग सूर्मी सुनि नन्दि यक्ताः।

भृष्या विषाणा छग वर्ष कृष्णा

मण्डूक बोबानिजिनाल चण्डाः॥

उदाक चक्राबक विश्व कर्णाः

पञ्चालको नट सुपिष्ट पीनाः।

पद्रुको सूरि नमाक पिष्टाः

पञ्चावको हरिण कौकिवनाः (१)॥

पटको वर्णनः गौनी त्रिलगाहः कल्पनः।

मञ्जीरको लम्पाट कवोद्वारिव (२) गौवराः॥

अयस्थूणी वदिक उक्षा गौठ-वर्तुली।

कृक्षा नटिलको गौरिक्लिनाकृष्णौ मन्दनः॥

पर्ष्टको नलिकानः ककुदः पौरिकमथा।

क्रोष्टिणि कुठारकलिका नौरितिकापि च॥

[illegible] नामविधिपिठकः यष्टी पौठिकमथा।

लवः सारा कलकूटः कुटिकलककुतृः॥

अट्टहा मातृभी मंहा नटीसंज्ञा मता इह।

भावहानि नु गड्डः भ्यादावेधे अमलौ मतः॥

---

१ गौरिक्त, इत्य। २ कदोड्, कालेय।

पाल्ये विकर्णोऽथ च्छौरङ्गदः परिषिकोऽपि च।
दशरथः कनीनश्च कन्यायाः ण्णे भवेत्तथा॥
त्रिवेण्यास्त्रिवणो विश्रवसस्तु रवणोऽपि च।
विश्रवणो मनोर्व्वा सन् गणसूत्रप्रमाणतः॥

इह्यादन्तानां पाठः ष्णिवाधनार्थः। द्व्यजिकारान्तानां स्त्रीत्यान्तानाञ्च ण्योयवाधनार्थः। तचन्—शब्दस्य कारुवाचकत्वात् ष्णिवाधनार्थः। तच्णोऽपत्यं ताच्णः, मनवर्ज्जान् इति अनन्तत्वात् नलोपो न स्यात्, कुर्व्वादित्वात् ताचण्यः। गङ्गाया अपत्यं गाङ्गः, अत्रयादित्वात् गाङ्गेयः, तिकादित्वात् गाङ्गायनिः। पीलाया अपत्य पैलः, अत्र्यादेराकृतिगणत्वात् पैलेयः। परे तु क्वचित् अपवादविषये उत्सर्गोऽभिनिविशत इति न्यायात् इत्याहुः। एवं साल्वाशब्दस्याप्युदाहरणीयम्। जरत्कारूशब्द ऊवन्तस्तन्वादिपाठात्। ऋष्टिषेणशब्दस्य सेनान्तत्वात् ण्यष्णिवाधनार्थः। कुरुवंशोत्पन्ना ऋषिवाचका अन्धकवंशोपन्ना वृष्णिवंशोत्पन्नाश्च सर्व्वे शिवादौ पठ्यन्ते। कुरोः—नाकुलः, साहदेव। ऋषेः—मूले वाशिष्ठ इति—वशिष्ठस्यापत्यम् इति वाक्यम्, एवं वैश्वामित्रः। अन्धकस्य—श्वाफल्कः, तौर्वसः। वृष्णेः—वासुदेवः, आनिरुद्ध इत्यादि। ननु सर्व्वेषां व्याकरणाना माहेशमूलकत्वेनाधुनिककुर्वृष्यन्धकवृष्णिवंशवाचकाना कथं शिवादौ पाठ इति चेत् सत्य, शिवस्य सर्व्वज्ञत्वात् तत्र तेषा सङ्कलनम्। यद्वा ऋषेरनादित्वात् कुर्वृष्यन्धकवृष्णिवंशा एवानादयः, अतएव तेभ्यस्त्यविधानमित्यदोषः। महद्दाना मानुषीसम्भाना तावत्—

चिन्तिताया अपत्यं चैन्तित: गैचित: गै... अवृद्धानां नदीसंज्ञकानां तावत्—यमुनाया अपत्यं यामुन:, इरावत्या अपत्यम् ऐरावत: नार्म्मद इत्यादि। अवृद्धा इति किं? वासवदत्तेय: चान्द्रभागेय: (१)। शुङ्गस्यापत्यं शौङ्गो भारद्वाज:, अन्यत्र शौङ्गि:। छगलस्यापत्यं छागल: आत्रेय:, अन्यत्र छागलायनि:। विकर्णस्यापत्यं वैकर्णो वात्स्य:, अन्यत्र वैकर्णि:। कन्याया अपत्यं कानीन: कर्ण: व्यासश्च। त्रिवेण्या अपत्यं त्रैवण:। विश्रवसोऽपत्यं रावण: वैश्रवणश्च। मनोरपत्यम् इत्यर्थे ष्ण:, तस्मिन्मनो: सन् वा, न इत्, मानुष: पक्षे मानव इति।

विदादेर्गोत्रेऽष्टपेस्त्वानन्तर्य्ये ट्ण:। (२) विदस्यान्तरापत्यं वैद:। एवम् और्व्व:। स्त्रियां पित्त्वादीप् वैदी इत्यादि।

विदादिर्यथा—

विद उर्व्वो भरद्वाज: किलात: कुशिको हरित्।
विश्वानर: कश्यपोऽपस्तम्बो वृष-रथीतरौ॥
कूचवारशरद्वन्तौ रथन्तरगविष्ठिरौ।
ऋष्टिषेणश्च किन्दर्भो मठरो विश्वविष्टपि॥
पुनर्भूर्दुहिता पुत्र: प्रतिबोध-ननान्दरौ।
हर्य्यश्व: प्रियको धेनुर्वध्योग-शुनकावपि॥

---

(१) अत्र चन्द्रभागा-पर्य्याय-चान्द्रभागा-चान्द्रभागीशब्दयोरन्यतरस्मात् ष्णेय:। अन्यथा वृद्धत्वं न स्यात्।

(२) विदादेर्गोत्रापत्यार्थे ट्ण स्यात्। अयमिदवृत्तिर्गणपरोधे द्रष्टव्या।

	Rs	
*Nirukta, (2nd Edition) Vol I Fasc. 1 @ Rs. 1 4	1	4
*Nyāyavārtika, Fasc. 2–6 @ /10/ each	3	2
Nityācārapaddhatih, Fasc 1–7 @ /10/ each	4	6
Nityācārapradīpa Vol I Fasc. 1–8, Vol II, Fasc 1-4 @ /10/ each	7	8
Nyayabinduṭikā, Fasc 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol II, Fasc 1–3 @ /10/ each	1	14
Nyāya Vartika Tatparya Parisudhi, Fasc. 1 2 @ /10/ each	1	4
Nyayasara	2	0
Padumawat @ 2/ each	10	0
Prākrita Paing... 1–7 @ /10/ each	4	6
Parāçara Smṛti, Vol I, Fasc 2 8, Vol II, Fasc 1–6, Vol III, Fasc 1–6 @ /10/ each	11	14
Parāçara, Institutes of (English) @ 1/- each	1	0
Parikṣamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1–3 @ 1/4/ each	3	12
Rasarnavam, Fasc 1 3	3	12
Ravisiddhanta Manjari, Fasc 1	0	10
Saddarsana-Samuccaya, Fasc 1 2 @ /10/ each	1	4
Samaraicca Kaha Fasc 1 5, @ /10/ each	3	2
Sāṅkhya Sūtra Vṛtti, Fasc 1–4 @ /10/ each	2	8
Ditto (English) Fasc 1–3 @ 1/ each	3	0
Six Buddhist Nyaya Tracts	0	10
Srāddha Kriyā Kaumudī, Fasc. 1 6 @ /10/ each	3	12
Suçruta Samhitā, (Eng) Fasc 1 @ 1/ each	1	0
Suddhikaumudī, Fasc 1 4 @ /10/ each	2	8
Sundarananadam Kavyam	1	0
Surya Siddhanta Fasc. 1-2 @ 1 4 each	2	8
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc 11 25 @ /10/ each	9	6
*Taitteriya Samhitā, Fasc 27–45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc 10–19 @ /10/ each	6	4
Tantra Vārteka (English) Fasc 1 10 @ 1/4/ each	12	8
*Tattva Cintāmaṇi, Vol I, Fasc 1–9, Vol II, Fasc 2-10 Vol III, Fasc 1–2, Vol IV Fasc 1, Vol V Fasc. 1–5 Part IV Vol II Fasc 1 12 @ /10/ each	23	12
Tattva Cintamani Didhiti Vivriti, Vol I, Fasc, 1 6 Vol. I, Fc, 1, @ /10/ each	4	6
Tattva Cintamani Didhiti Prakas, Fasc 1 5, @ /10/ each	3	2
Tattvārthadhigama Sutram, Fasc 1 3 @ /10/ each	1	14
Tirthacintamoni, Fasc, 1 3, @ /10/ each	1	14
Trikāṇḍa Maṇḍanam, Fasc 1 3 @ /10/ each	1	14
Tulasi Satsai, Fasc 1 5 @ /10/ each	3	2
*Upamita bhava prapañca kathā, Fasc 1 2 5 13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc 1–6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1–6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol I, Fasc 3–6, Vol II, Fasc 1 7, @ /10/ each	6	14
Vidhāna Pārijata, Fasc 1–8 Vol II Fasc I @ /10/ each	5	10
Ditto Vol II, Fasc 2 5 @ 1/4/	5	0
Vivādaratnākara, Fasc 1–7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc 1–6 @ /10/ each	3	12
Yogasāstra Fasc. 1 3	3	12

Tibetan Series

Amarkosha	2	0
Baudhastotrasangraha, Vol I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc 1–4 @ 1/ each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag Sam S'hi Thi, Fasc 1–4 @ 1/ each	4	0
Rtogs brjod dpag hkhri S'iñ (Tib & Sans Avadāna Kalpalatā Vol I, Fasc. 1 10, Vol II Fasc 1–10 @ 1/ each	20	0
Sher Phyin, Vol I, Fasc 1 5, Vol II, Fasc 1 3, Vol III, Fasc 1 6, @ 1/ each	14	0

Arabic and Persian Series

Āmal-i-Salih, or Shah Jahan Namah	2	0
Al Muqaddasi (English) Vol I, Fasc. 1–4 @ 1/ each	4	0
Āīn-i Akbarī, Fasc. 1 22 @ 1/8/ each	33	0
Ditto (English) Vol II, Fasc. 1 5 Vol III, Fasc 1-5, Index to Vol II @ 2/- each	22	0
Akbarnāmah, with Index, Fasc. 1–37 @ 1/8/ each	55	8
Akbarnāmah, English Vol I, Fasc 1–8, Vol II, Fasc 1–7, Vol III, Fasc 1–2 @ 1/4/ each	21	4
Arabic Bibliography, by Dr A Sprenger, @ /10/	0	10
Conquest of Syria, Fasc 1 9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/ each	2	0

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied

	Rs	As
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal Fasc 1–3 @ 1/ each	Rs 3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc 1 21 @ 1/8/ each	31	8
Faras Nama, of Hashmi	1	0
Ditto of Zabardast Khan	1	0
Farhang-i-Rashidi, Fasc 1–14 @ 1/8/ each ..	21	0
Fihrist-i Tusi or, Tusy's list of Shy'ah Books, Fasc 1–4 @ 1/- each	4	0
Gulriz	1	0
Hadiqatu L, Haqiqat, (Text & Eng) ..	2	0
History of Gujarat	5	8
Haft Asman, History of the Persian Masnawi, Fasc 1 @ /12/ each	0	12
History of the Caliphs, (English) Fasc 1–6 @ 1/4/ each	7	8
Iqalnamah i-Jahangiri, Fasc 1–3 @ /10/ each ..	1	14
Isabah with Supplement, 51 Fasc @ 1/- each	51	0
Maasir i Rahimi, Part I, Fasc 1–8 @ 2/ each	6	0
Maasir ul Umara, Vol I, Fasc 1–9, Vol II, Fasc 1-9, Vol III, 1 10; Index to Vol I, Fasc 10 11, Index to Vol II, Fasc 10 12, Index to Vol III, Fasc 11-12 @ /1/ each	35	0
Ditto (Eng) Vol I, Fasc 1–2, @ 1/4/ each	2	8
Memoirs of Tahmasp ..	1	0
Marhamu 'L Ilali 'L-Mu'Dila Fasc 1- 2	2	0
Muntakhabu t-Tawarikh, Fasc 1–15 @ /10/ each	9	6
Ditto (English) Vol I, Fasc 1 7, Vol II Fasc 1–5 and 3 Indexes, Vol III, Fasc 1 @ 1/ each ...	16	0
Muntakhabu l Lubab, Fasc 1–19 @ /10/ each	11	14
Ditto Part 3, Fasc 1–2 @ 1/- each ..	1	0
Nukhbatu l Fikr, Fasc 1 @ /10/ ..	0	10
Nizami's Khiradnamah i Iskandari, Fasc 1–2 @ /12/ each	1	8
Persian and Turki Divans of Bayram Khan, Khan Khanan ...	1	0
Qawanimu 's Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut Col D C Phillott ..	5	0
Riyazu s Salatin, Fasc 1–5 @ /10/ each ..	3	2
Ditto (English) Fasc 1- 5 @ 1/	5	0
Shah Alam Nama	1	14
Tadhkira i khushnawisan	1	0
Tabaquat i Nasiri, (English), Fasc 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tarikh i Firuz Shahi of Ziyau-d-din Barni Fasc 1–7 @ /10/ each	4	6
Tarikh i Firuzshahi, of Shams i Siraj Aif Fasc 1–6 @ /10/ each	3	12
Ten Ancient Arabic Poems, Fasc 1–2 @ 1/8/ each ..	3	0
The Mabani 'L Lughat A Grammar of the Turki Language in Persian	1	8
Tuzuk i Jahangiri, (Eng) Fasc 1 @ 1/	1	0
Wis-o Ramin, Fasc 1–5 @ /10/ each	3	2
Zafarnamah, Vol I, Fasc 1–9, Vol II, Fasc 1 8 @ /10/ each ..	10	10

ASIATIC SOCIETY'S PUBLICATIONS

1 ASIATIC RESEARCHES Vols XX @ 10/ each — 20 0

2 PROCEEDINGS of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No

3 JOURNAL of the Asiatic Society for 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6) 1886 (8), 1887 (7), 1888 (7), 1889 (10 1890 (11), 1891 (7) 1892 (8) 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No to Non Members

N B—The figures enclosed in brackets give the number of Nos in each Volume

4 Journal and Proceedings, N S, 1905, to date, (Nos 1-4 of 1905 are out of stock), @ 1-8 per No to Members and Rs 2 per No to Non Members

5 Memoirs, 1905, to date Price varies from number to number Discount of 25% to Members

6 Centenary Review of the Researches of the Society from 1784 1883 ... 3 0

7 Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 3 0

8 Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III with 8 coloured Plates, 4to @ 6/ each ... 18 0

9 Kaçmiraçabdamrta, Parts I & II @ 1/8/ — 3 0

10 Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad i Kirmani, and edited with notes by Major D. C Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc 1 34 @ 1/ each ... 34 0

Nepalese Buddhist Sanskrit Literature, by Dr R. L Mitra — 5 0

N B—All Cheques, Money Orders, &c must be made payable to the "Treasurer Asiatic Society," only

6 6 12

Books are supplied by V P P